V S N Bardy

# विषयानुक्रमणिका


| | | |
|---|---|---|
| लघुन्यासः | | १ |
| श्रीरुद्रप्रश्नः | | ६ |
| चमकप्रश्नः | ... | १६ |
| **सूक्तानि—** | | |
| पुरुषसूक्तम् | ... | २२ |
| नारायणसूक्तम् | ... | २५ |
| विष्णुसूक्तम् | ... | २७ |
| श्रीसूक्तम् | ... | २८ |
| भूसूक्तम् | | ३१ |
| नीळासूक्तम् | ... | [illegible] |
| दुर्गासूक्तम् | ... | ३३ |
| भाग्यसूक्तम् | ... | ३४ |
| ऋग्वेदीयदेवीसूक्तम् | ... | ३५ |
| ऋग्वेदीय रात्रिसूक्तम् | ... | ३७ |
| पवमानसूक्तम् (पुण्याहवाचनम्) | ... | ३८ |
| मेधासूक्तम् | ... | ४० |
| आयुष्यसूक्तम् | ... | ४१ |
| नक्षत्रसूक्तम् | ... | ४३ |
| शान्तिपंचकम् | | ५१ |



SRI GNANANANDA NIKETAN.
LIBRARY,
THAPOVANAM P. O.
Pin-605756.

## आह्निकमन्त्राः


| | | |
|---|---|---|
| सन्ध्यावन्दनम् | ... | ५३ |
| समिदाधानम् | ... | ६१ |
| ब्रह्मयज्ञः | ... | ६४ |
| यज्ञोपवीतधारणमन्त्रः | ... | ६६ |
| पितृपूजामन्त्राः | ... | ६७ |
| होममन्त्राः | ... | ७५ |
| जयादिमन्त्राः | ... | ७८ |
| देवपूजामन्त्राः | ... | ८० |


## तैत्तिरीययजुर्ब्राह्मणे काठकभागः—


| | | |
|---|---|---|
| [illegible] | ... | ९५ |
| द्वित[illegible] प्रश्नः | ... | १०१ |
| तृतीयः प्रश्नः | ... | ११९ |


## अनुबन्धः


| | | |
|---|---|---|
| मन्त्रानुक्रमणिका | ... | १३९ |

# ॥ तैत्तिरीयमन्त्रकोशः ॥

## द्वितीयो भागः

## ॥ श्रीरुद्रप्रश्नः ॥

### ॥ लघुन्यासः ॥

अथात्मानं शिवात्मानं श्रीरुद्ररूपं ध्यायेत् ॥
शुद्धस्फटिकसंकाशं त्रिनेत्रं पंचवक्त्रकम् ।
गंगाधरं दशभुजं सर्वाभरणभूषितम् ॥
नीलग्रीवं शशांकांकं नागयज्ञोपवीतिनम् ।
व्याघ्रचर्मोत्तरीयं च वरेण्यमभयप्रदम् ॥
कमण्डल्वक्षसूत्राणां धारिणं शूलपाणिनम् ।
ज्वलन्तं पिंगलजटा-शिखामुद्योतधारिणम् ॥
वृषस्कन्ध-समारूढं उमादेहार्ध-धारिणम् ।
अमृतेनाप्लुतं शान्तं दिव्यभोग-समन्वितम् ॥
दिग्देवतासमायुक्तं सुरासुरनमस्कृतम् ।
नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमव्ययम् ॥
सर्वव्यापिन-मीशानं रुद्रं वै विश्वरूपिणम् ।
एवं ध्यात्वा द्विजस्सम्यक् ततो यजनमारभेत् ॥

अथातो रुद्रस्नानार्चनाभिषेकविधिं व्याख्यास्यामः । आदित एव तीर्थे स्नात्वा उदेत्य शुचिः प्रयतो ब्रह्मचारी शुक्लवासा देवाभिमुखः स्थित्वा आत्मनि देवताः स्थापयेत् ॥

प्रजनने ब्रह्मा तिष्ठतु । पादयोर्विष्णुस्तिष्ठतु । हस्तयोर्हरस्तिष्ठतु । बाह्वोरिन्द्रस्तिष्ठतु । जठरेऽग्निस्तिष्ठतु । हृदये शिवस्तिष्ठतु । कण्ठे वसवस्तिष्ठन्तु । वक्त्रे सरस्वती तिष्ठतु । नासिकयोर्वायुस्तिष्ठतु । नयनयोश्चन्द्रादित्यौ तिष्ठेताम् । कर्णयोरश्विनौ तिष्ठेताम् । ललाटे रुद्रास्तिष्ठन्तु । मूर्ध्न्यादित्यास्तिष्ठन्तु । शिरसि महादेवस्तिष्ठतु । शिखायां वामदेवस्तिष्ठतु । पृष्ठे पिनाकी तिष्ठतु । पुरतः शूली तिष्ठतु । पार्श्वयोः शिवाशंकरौ तिष्ठेताम् । सर्वतो वायुस्तिष्ठतु । ततो बहिः सर्वतोऽग्निर्ज्वालामाला-परिवृतस्तिष्ठतु । सर्वेष्वङ्गेषु सर्वा देवता यथास्थानं तिष्ठन्तु । मां रक्षन्तु ॥

अ॒ग्निर्मे॑ वा॒चि श्रि॒तः । वाग्घृद॑ये । हृद॑यं॒ मयि॑ । अ॒हम॒मृते॑ । अ॒मृतं॒ ब्रह्म॑णि । वा॒युर्मे॑ प्रा॒णे श्रि॒तः । प्रा॒णो हृद॑ये । हृद॑यं॒ मयि॑ । अ॒हम॒मृते॑ । अ॒मृतं॒ ब्रह्म॑णि । सूर्यो॑ मे॒ चक्षु॑षि श्रि॒तः । चक्षु॒र्हृद॑ये । हृद॑यं॒ मयि॑ । अ॒हम॒मृते॑ । अ॒मृतं॒ ब्रह्म॑णि । च॒न्द्रमा॑ मे॒ मन॑सि श्रि॒तः ।

मनो हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । दिशो मे श्रोत्रे श्रिताः । श्रोत्रगं हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । आपो मे रेतसि श्रिताः । रेतो हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । पृथिवी मे शरीरे श्रिता । शरीरगं हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । ओषधिवनस्पतयो मे लोमसु श्रिताः । लोमानि हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । इन्द्रो मे बले श्रितः । बलगं हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । पर्जन्यो मे मूर्ध्नि श्रितः । मूर्धा हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । ईशानो मे मन्यौ श्रितः । मन्युर्हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । आत्मा म आत्मनि श्रितः । आत्मा हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । पुनर्म आत्मा पुनरायुरागात् । पुनः प्राणः पुनराकूतमागात् वैश्वानरो रश्मिभिर्वावृधानः । अन्तस्तिष्ठत्वमृतस्य गोपाः ॥

अस्य श्री रुद्राध्यायप्रश्नमहामन्त्रस्य अघोर ऋषिः, अनुष्टुप्छन्दः, संकर्षणमूर्तिस्वरूपो योऽसावादित्यः परमपुरुषः

स एष रुद्रो देवता। नमः शिवायेति बीजम्। शिवतरायेति शक्तिः। महादेवायेति कीलकम्। श्रीसाम्बसदाशिव-प्रसादसिद्ध्यर्थे जपे विनियोगः॥

ओं अग्निहोत्रात्मने अङ्गुष्ठाभ्यां नमः। दर्शपूर्णमासात्मने तर्जनीभ्यां नमः। चातुर्मास्यात्मने मध्यमाभ्यां नमः। निरूढपशुबन्धात्मने अनामिकाभ्यां नमः। ज्योतिष्टोमात्मने कनिष्ठिकाभ्यां नमः। सर्वक्रत्वात्मने करतलकरपृष्ठाभ्यां नमः॥ अग्निहोत्रात्मने हृदयाय नमः। दर्शपूर्णमासात्मने शिरसे स्वाहा। चातुर्मास्यात्मने शिखायै वषट्। निरूढपशुबन्धात्मने कवचाय हुं। ज्योतिष्टोमात्मने नेत्रत्रयाय वौषट्। सर्वक्रत्वात्मने अस्त्राय फट्। भूर्भुवस्सुवरोमिति दिग्बन्धः॥

ध्यानम्—

आपाताळ-नभःस्थलान्त-भुवन-ब्रह्माण्ड-माविस्फुर-
ज्ज्योतिःस्फाटिक-लिङ्ग-मौळि-विलसत्पूर्णेन्दु-वान्तामृतैः।
अस्तोकाप्लुत-मेक-मीश-मनिशं रुद्रानुवाकाञ्जपन्
ध्याये-दीप्सित-सिद्धये ध्रुवपदं विप्रोऽभिषिञ्चे-च्छिवम्॥

ब्रह्माण्डव्याप्तदेहा [1]भसितहिमरुचा भासमाना भुजङ्गैः
कण्ठे कालाः कपर्दाकलित-शशिकला-श्चण्डकोदण्डहस्ताः।

1. हिम भसित

त्र्यक्षा रुद्राक्षमालाः प्रकटितविभवाः [2]शाम्भवा मूर्तिभेदा
रुद्राः श्रीरुद्रसूक्त-प्रकटितविभवा नः प्रयच्छन्तु सौख्यम् ॥

ओं गणानां त्वा गणपतिगूं हवामहे कविं कवीनामुपमश्रव-स्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिस्सीद सादनम् ॥ महागणपतये नमः ॥

## ॥ शान्ति-पाठः ॥

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे ॥

ओं शान्तिः शान्तिः शान्तिः ॥

2. प्रणतभयहराः —पाठ भेदः ।

ॐ

# ॥ श्रीरुद्रप्रश्नः ॥

## ॐ नमो भगवते रुद्राय

नमस्ते रुद्र मन्यव उतोत इषवे नमः । नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः । या त इषुः शिवतमा शिवं बभूव ते धनुः । शिवा शरव्या या तव तया नो रुद्र मृडय । या ते रुद्र शिवा तनूरघोराऽपापकाशिनी । तया नस्तनुवा शन्तमया गिरिशंताभिचाकशीहि । यामिषुं गिरिशंत हस्ते बिभर्ष्यस्तवे । शिवां गिरित्र तां कुरु मा हिंसीः पुरुषं जगत् । शिवेन वचसा त्वा गिरिशाच्छावदामसि । यथा नः सर्वमिज्जगदयक्ष्मगं सुमना असत् । अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् । अहीगंश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यः । असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः । ये चेमागं रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषागं हेड ईमहे । असौ योऽवसर्पति नीलग्रीवो विलोहितः । उतैनं गोपा

अदृशन्नदृशन्नुदहार्यः । उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः ।
नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे । अथो ये अस्य
सत्त्वानोऽहं तेभ्योऽकरन्नमः । प्रमुञ्च धन्वनस्त्व-मुभयोरार्त्नियोर्ज्याम् ।
याश्च ते हस्त इषवः परा ता भगवो वप । अवतत्य धनुस्त्वग्ं
सहस्राक्ष शतेषुधे । निशीर्य शल्यानां मुखा शिवो नः सुमना भव ।
विज्यं धनुः कपर्दिनो विशल्यो बाणवाग्ं उत । अनेशन्नस्येषव आभुरस्य
निषंगथिः । या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः । तयास्मान्विश्व-
तस्त्वमयक्ष्मया परिब्भुज । नमस्ते अस्त्वायुधायानातताय धृष्णवे ।
उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने । परि ते धन्वनो
हेतिरस्मान्वृणक्तु विश्वतः । अथो य इषुधिस्तवारे अस्मन्निधेहि तम् ॥१॥

नमस्ते अस्तु भगवन्विश्वेश्वराय महादेवाय त्र्यम्बकाय
त्रिपुरान्तकाय त्रिकाग्निकालाय* कालाग्निरुद्राय नीलकण्ठाय मृत्युंजयाय
सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय नमः ॥

नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो नमो वृक्षेभ्यो
हरिकेशेभ्यः पशूनां पतये नमो नमः सस्पिञ्जराय त्विषीमते पथीनां

---

* त्रिकालाग्नि कालाय. —पाठभेदः

पतये नमो नमो बभ्लुशाय विव्याधिनेऽन्नानां पतये नमो नमो हरिकेशायोपवीतिने पुष्टानां पतये नमो नमो भवस्य हेत्यै जगतां पतये नमो नमो रुद्रायाततायिने क्षेत्राणां पतये नमो नमः सूतायाहन्त्याय वनानां पतये नमो नमो रोहिताय स्थपतये वृक्षाणां पतये नमो नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमो नमो भुवंतये वारिवस्कृतायौषधीनां पतये नमो नम उच्चैर्घोषायाक्रन्दयते पत्तीनां पतये नमो नमः कृत्स्नवीताय धावते सत्त्वनां पतये नमः ॥ २ ॥

नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमो नमः ककुभाय निषङ्गिणे स्तेनानां पतये नमो नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमो नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो नमो निचेरवे परिचरायारण्यानां पतये नमो नमः सृकाविभ्यो जिघाग्ंसद्भ्यो मुष्णतां पतये नमो नमोऽसिमद्भ्यो नक्तंचरद्भ्यः प्रकृन्तानां पतये नमो नम उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो नम इषुमद्भ्यो धन्वाविभ्यश्च वो नमो नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो नम आयच्छद्भ्यो विसृजद्भ्यश्च वो नमो

नमोऽस्यद्भ्यो विध्यद्भ्यश्च वो नमो नम आसीनेभ्यः शयनेभ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमो अश्वेभ्योऽश्वपतिभ्यश्च वो नमः ॥ ३ ॥

नम आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो नम उगणाभ्यस्तृंहतीभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो नमो महद्भ्यः क्षुल्लकेभ्यश्च वो नमो नमो रथिभ्योऽरथेभ्यश्च वो नमो नमो रथेभ्यो रथपतिभ्यश्च वो नमो नमः सेनाभ्यः सेनानिभ्यश्च वो नमो नमः क्षत्तृभ्यः संग्रहीतृभ्यश्च वो नमो नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो नमः पुञ्जिष्टेभ्यो निषादेभ्यश्च वो नमो नम इषुकृद्भ्यो धन्वकृद्भ्यश्च वो नमो नमो मृगयुभ्यः श्वनिभ्यश्च वो नमो नमः श्वभ्यः श्वपतिभ्यश्च वो नमः ॥ ४ ॥

नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च नमो गिरिशाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च संवृध्वने च नमो अग्रियाय च प्रथमाय च नम आशवे चाजिराय च नमः शीघ्रियाय च शीभ्याय च नम ऊर्म्याय चावस्वन्याय च नमः स्रोतस्याय च द्वीप्याय च ॥ ५ ॥

नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च नमो मध्यमाय चापगल्भाय च नमो जघन्याय च बुध्नियाय च नमः सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय च नम उर्वर्याय च खल्याय च नमः श्लोक्याय चाऽवसान्याय च नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च नम आशुषेणाय चाशुरथाय च नमः शूराय चावभिन्दते च नमो वर्मिणे च वरूथिने च नमो बिल्मिने च कवचिने च नमः श्रुताय च श्रुतसेनाय च ॥ ६ ॥

नमो दुन्दुभ्याय चाहनन्याय च नमो धृष्णवे च प्रमृशाय च नमो दूताय च प्रहिताय च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्वने च नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः सूद्याय च सरस्याय च नमो नाद्याय च वैशन्ताय च नमः कूप्याय चावट्याय च नमो वर्ष्याय चावर्ष्याय च नमो मेघ्याय च विद्युत्याय च नम ईध्रियाय चातप्याय च नमो वात्याय च रेष्मियाय च नमो वास्तव्याय च वास्तुपाय च ॥ ७ ॥

नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च नमः शङ्गाय च पशुपतये च नम उग्राय च भीमाय च नमो अग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय नमश्शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च नमस्तीर्थ्याय च कूल्याय च नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च नम आतार्याय चालाद्याय च नमः शष्प्याय च फेन्याय च नमः सिकत्याय च प्रवाह्याय च ॥ ८ ॥

नम॑ इरिण्या॑य च प्रपथ्या॑य च॒ नमः॑ किꣳशिलाय॑ च॒ क्षय॑णाय च॒ नमः॑ कप॒र्दिने॑ च पुल॒स्तये॑ च॒ नमो॒ गोष्ठ्या॑य च॒ गृह्या॑य च॒ नम॒स्तल्प्या॑य च॒ गेह्या॑य च॒ नमः॑ काट्या॑य च गह्वरे॒ष्ठाय॑ च॒ नमो॑ ह्रद॒य्या॑य च निवे॒ष्प्या॑य च॒ नमः॑ पाꣳस॒व्या॑य च रज॒स्या॑य च॒ नमः॒ शुष्क्या॑य च हरि॒त्या॑य च॒ नमो॒ लोप्या॑य चोल॒प्या॑य च॒ नम॒ ऊर्व्या॑य च सू॒र्म्या॑य च॒ नमः॑ प॒र्ण्या॑य च पर्णश॒द्या॑य च॒ नमो॑ऽपगु॒रमा॑णाय चाभिघ्न॒ते च॒ नम॑ आख्खिद॒ते च॑ प्रख्खिद॒ते च॒ नमो॑ वः किरि॒केभ्यो॑ दे॒वाना॒ꣳ॒ हृद॑येभ्यो॒ नमो॑ विक्षीण॒केभ्यो॒ नमो॑ विचिन्व॒त्केभ्यो॒ नम॑ आनिर्ह॒तेभ्यो॒ नम॑ आमीव॒त्केभ्यः॑ ॥ ९ ॥

द्रापे॒ अन्ध॑सस्पते॒ दरि॑द्र॒न्नील॑लोहित । ए॒षां पुरु॑षाणामे॒षां प॑शू॒नां मा भेर्मारो॒ मो ए॑षां॒ किंच॒नाम॑मत् । या ते॑ रुद्र शि॒वा त॒नूः शि॒वा वि॒श्वाह॑भेषजी । शि॒वा रु॒द्रस्य॑ भेष॒जी तया॑ नो मृड जी॒वसे॑ । इ॒माꣳ रु॒द्राय॑ त॒वसे॑ कप॒र्दिने॑ क्ष॒यद्वी॑राय॒ प्रभ॑रामहे म॒तिम् । यथा॑ नः॒ शम॑स॒द्द्वि॒पदे॒ चतु॑ष्पदे॒ विश्वं॑ पु॒ष्टं ग्रामे॑ अ॒स्मिन्न॑ना॒तुरम् । मृ॒डा नो॑ रुद्रो॒त नो॒ मय॑स्कृधि क्ष॒यद्वी॑राय॒ नम॑सा विधेम

ते । यच्छं च योश्च मनुरायजे पिता तदश्याम तव रुद्र प्रणीतौ ।
मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् ।
मा नोऽवधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः ।
मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु
रीरिषः । वीरान्मा नो रुद्र भामितोऽवधीर्हविष्मन्तो नमसा विधेम ते ।
आरात्ते गोघ्न उत पूरुषघ्ने क्षयद्वीराय सुम्नमस्मे ते अस्तु ।
रक्षा च नो अधि च देव ब्रूह्यथा च नः शर्म यच्छ द्विबर्हाः ।
स्तुहि श्रुतं गर्तसदं युवानं मृगन्न भीममुपहत्नुमुग्रम् । मृडा जरित्रे
रुद्र स्तवानो अन्यन्ते अस्मन्निवपन्तु सेनाः । परिणो रुद्रस्य
हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः । अव स्थिरा मघवद्भ्यस्तनुष्व
मीढ्वस्तोकाय तनयाय मृडय । मीढुष्टम शिवतम शिवो नः सुमना
भव । परमे वृक्ष आयुधन्निधाय कृत्तिं वसान आचर पिनाकं
बिभ्रदागहि । विकिरिद् विलोहित नमस्ते अस्तु भगवः । यास्ते
सहस्रं हेतयोन्यमस्मन्निवपन्तु ताः । सहस्राणि सहस्रधा बाहुवोस्तव
हेतयः । तासामीशानो भगवः पराचीना मुखा कृधि ॥ १० ॥

सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम् । तेषाग्ं सहस्रयोजनेऽवधन्वानि तन्मसि । अस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि । नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः । नीलग्रीवाः शितिकण्ठा दिवग्ं रुद्रा उपश्रिताः । ये वृक्षेषु सस्पिञ्जरा नीलग्रीवा विलोहिताः । ये भूतानामधिपतयो विशिखासः कपर्दिनः । ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् । ये पथां पथिरक्षय ऐलबृदा यव्युधः । ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः । य एतावन्तश्च भूयाग्ंसश्च दिशो रुद्रा वितस्थिरे । तेषाग्ंसहस्रयोजनेऽवधन्वानि तन्मसि । नमो रुद्रेभ्यो ये पृथिव्यां येऽन्तरिक्षे ये दिवि येषामन्नं वातो वर्षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि ॥ ११ ॥

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय माऽमृतात् । यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमो अस्तु ।

तमु ष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति भेषजस्य । यक्ष्वामहे सौमनसाय रुद्रं नमोभिर्देवमसुरं दुवस्य । अयं मे हस्तो भगवानयं मे भगवत्तरः । अयं मे विश्वभेषजोऽयंं शिवाभिमर्शनः । ये ते सहस्रमयुतं पाशा मृत्यो मर्त्याय हन्तवे । तान्यज्ञस्य मायया सर्वानव यजामहे । मृत्यवे स्वाहा मृत्यवे स्वाहा । ओं नमो भगवते रुद्राय विष्णवे मृत्युर्मे पाहि ॥

प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः । तेनान्नेनाप्यायस्व ॥

ओं शान्तिः शान्तिः शान्तिः ॥

## ॥ चमकप्रश्नः ॥

अग्नाविष्णू सजोषसेमावर्धन्तु वां गिरः । द्युम्नैर्वाजेभिरागतम् । वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे सुवश्च मे प्राणश्च मेऽपानश्च मे व्यानश्च मेऽसुश्च मे चित्तं च म आधीतं च मे वाक्च मे मनश्च मे चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं च म ओजश्च मे सहश्च म आयुश्च मे जरा च म आत्मा च मे तनूश्च मे शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थानि च मे परूꣳषि च मे शरीराणि च मे ॥ १ ॥

ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मेऽमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्ष्मा च मे द्राघुया च मे वृद्धं च मे वृद्धिश्च मे सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे वशश्च मे त्विषिश्च मे क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे

वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथं च म ऋद्धं च म ऋद्धिश्च मे क्लृप्तं च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे ॥ २ ॥

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे ॥ ३ ॥

ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु च मे प्रभु च मे बहु च मे भूयश्च मे पूर्णं च मे पूर्णतरं च मेऽक्षितिश्च मे कूयवाश्च मेऽन्नं च मेऽक्षुच्च मे व्रीहयश्च मे यवाश्च

मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे गोधूमाश्च मे मसुराश्च मे प्रियंगवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे ॥ ४ ॥

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे सीसं च मे त्रपुश्च मे श्यामं च मे लोहं च मेऽग्निश्च म आपश्च मे वीरुधश्च म ओषधयश्च मे कृष्टपच्यं च मेऽकृष्टपच्यं च मे ग्राम्याश्च मे पशव आरण्याश्च यज्ञेन कल्पन्तां वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मेऽर्थश्च म एमश्च म इतिश्च मे गतिश्च मे ॥ ५ ॥

अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे सविता च म इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे पूषा च म इन्द्रश्च मे बृहस्पतिश्च म इन्द्रश्च मे मित्रश्च म इन्द्रश्च मे वरुणश्च म इन्द्रश्च मे त्वष्टा च म इन्द्रश्च मे धाता च म इन्द्रश्च मे विष्णुश्च म इन्द्रश्च मेऽश्विनौ च म इन्द्रश्च मे मरुतश्च म इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे पृथिवी च म इन्द्रश्च मेऽन्तरिक्षं च म इन्द्रश्च मे

द्यौश्च म इन्द्रश्च मे दिशश्च म इन्द्रश्च मे मूर्धा च म इन्द्रश्च मे प्रजापतिश्च म इन्द्रश्च मे ॥ ६ ॥

अगंशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म उपागंशुश्च मेऽन्तर्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरुणश्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च म आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ऋतुग्रहाश्च मेऽतिग्राह्याश्च म ऐन्द्राग्नश्च मे वैश्वदेवश्च मे मरुत्वतीयाश्च मे माहेन्द्रश्च म आदित्यश्च मे सावित्रश्च मे सारस्वतश्च मे पौष्णश्च मे पात्नीवतश्च मे हारियोजनश्च मे ॥ ७ ॥

इध्मश्च मे बर्हिश्च मे वेदिश्च मे धिष्णियाश्च मे स्रुचश्च मे चमसाश्च मे ग्रावाणश्च मे स्वरवश्च म उपरवाश्च मेऽधिषवणे च मे द्रोणकलशश्च मे वायव्यानि च मे पूतभृच्च म आधवनीयश्च म आग्नीध्रं च मे हविर्धानं च मे गृहाश्च मे सदश्च मे पुरोडाशाश्च मे पचताश्च मेऽवभृथश्च मे स्वगाकारश्च मे ॥ ८ ॥

अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे दितिश्च मे द्यौश्च मे शक्वरीरङ्गुलयो दिशश्च मे यज्ञेन कल्पन्तामृक्च मे साम च मे स्तोमश्च मे यजुश्च मे दीक्षा च मे तपश्च म ऋतुश्च मे व्रतं च मेऽहोरात्रयोर्वृष्ट्या बृहद्रथन्तरे च मे यज्ञेन कल्पेताम् ॥ ९ ॥

गर्भाश्च मे वत्साश्च मे त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट् च तुर्यौही च मे पष्ठवाट् च मे पष्ठौही च म उक्षा च मे वशा च म ऋषभश्च मे वेहच्च मेऽनड्वाञ्च मे धेनुश्च म आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतामपानो यज्ञेन कल्पतां व्यानो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पतागुं श्रोत्रं यज्ञेन कल्पतां मनो यज्ञेन कल्पतां वाग्यज्ञेन कल्पतामात्मा यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम् ॥ १० ॥

एका च मे तिस्रश्च मे पञ्च च मे सप्त च मे नव च म एकादश च मे त्रयोदश च मे पञ्चदश च मे सप्तदश च मे नवदश

च म एकविंशतिश्च मे त्रयोविंशतिश्च मे पञ्चविंशतिश्च मे सप्तविंशतिश्च मे नवविंशतिश्च म एकत्रिंशच्च मे त्रयस्त्रिंशच्च मे चतस्रश्च मेऽष्टौ च मे द्वादश च मे षोडश च मे विंशतिश्च मे चतुर्विंशतिश्च मेऽष्टाविंशतिश्च मे द्वात्रिंशच्च मे षट्त्रिंशच्च मे चत्वारिंशच्च मे चतुश्चत्वारिंशच्च मेऽष्टाचत्वारिंशच्च मे वाजश्च प्रसवश्चापिजश्च क्रतुश्च सुवश्च मूर्धा च व्यश्नियश्चान्त्यायनश्चान्त्यश्च भौवनश्च भुवनश्चाधिपतिश्च ॥ ११ ॥

इडा देवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानि शंसिषद्विश्वे देवाः सूक्तवाचः पृथिविमातर्मा मा हिंसीर्मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासंशुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु ॥

ओं शान्तिः शान्तिः शान्तिः ॥

ॐ

# ॥ पुरुषसूक्तम् ॥

ॐ सहस्रशीर्षा पुरुषः। सहस्राक्षः सहस्रपात्। स भूमिं विश्वतो वृत्वा। अत्यतिष्ठद्दशाङ्गुलम्। पुरुष एवेदगं सर्वम्। यद्भूतं यच्च भव्यम्। उतामृतत्वस्येशानः। यदन्नेनातिरोहति। एतावानस्य महिमा। अतो ज्यायागंश्च पूरुषः। १·१ ॥ पादोऽस्य विश्वा भूतानि। त्रिपादस्यामृतं दिवि। त्रिपादूर्ध्व उदैत्पुरुषः। पादोऽस्येहाऽऽभवात्पुनः। ततो विष्वङ्व्यक्रामत्। साशनानशने अभि। तस्माद्विराडजायत। विराजो अधि पूरुषः। स जातो अत्यरिच्यत। पश्चाद्भूमिमथो पुरः। १·२ ॥ यत्पुरुषेण हविषा। देवा यज्ञमतन्वत। वसन्तो अस्यासीदाज्यम्। ग्रीष्म इध्मश्शरद्धविः। सप्तास्यासन्परिधयः। त्रिः सप्त समिधः कृताः। देवा यद्यज्ञं तन्वानाः। अबध्नन्पुरुषं पशुम्। तं यज्ञं बर्हिषि प्रौक्षन्। पुरुषं जातमग्रतः। १·३ ॥ तेन देवा अयजन्त। साध्या ऋषयश्च ये। तस्माद्यज्ञात्सर्वहुतः। संभृतं पृषदाज्यम्। पशूगंस्तागंश्चक्रे वायव्यान्।

आरण्यान्ग्राम्याश्च ये । तस्माद्यज्ञात्सर्वहुतः । ऋचः सामानि जज्ञिरे । छन्दाग्ंसि जज्ञिरे तस्मात् । यजुस्तस्मादजायत । १·४ ॥ तस्मादश्वा अजायन्त । ये के चोभयादतः । गावो ह जज्ञिरे तस्मात् । तस्माज्जाता अजावयः । यत्पुरुषं व्यदधुः । कतिधा व्यकल्पयन् । मुखं किमस्य कौ बाहू । कावूरू पादावुच्येते । ब्राह्मणोऽस्य मुखमासीत् । बाहू राजन्यः कृतः । १·५ ॥ ऊरू तदस्य यद्वैश्यः । पद्भ्याग्ं शूद्रो अजायत । चन्द्रमा मनसो जातः । चक्षोः सूर्यो अजायत । मुखादिन्द्रश्चाग्निश्च । प्राणाद्वायुरजायत । नाभ्या आसीदन्तरिक्षम् । शीर्ष्णो द्यौः समवर्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात् । तथा लोकाग्ं अकल्पयन् । १·६ ॥ वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसस्तु पारे । सर्वाणि रूपाणि विचित्य धीरः । नामानि कृत्वाऽभिवदन् यदास्ते । धाता पुरस्ताद्यमुदाजहार । शक्रः प्रविद्वान्प्रदिशश्चतस्रः । तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते । यज्ञेन यज्ञमयजन्त देवाः । तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्ते । यत्र पूर्वे साध्याः सन्ति देवाः ॥ १·७ ॥

अद्भ्यः संभूतः पृथिव्यै रसाच्च । विश्वकर्मणः समवर्तताधि । तस्य त्वष्टा विदधद्रूपमेति । तत्पुरुषस्य विश्वमाजानमग्रे । वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसः परस्तात् । तमेवं विद्वानमृत इह भवति । नान्यः पन्था विद्यतेऽयनाय । प्रजापतिश्चरति गर्भे अन्तः । अजायमानो बहुधा विजायते ॥ २·१ ॥

तस्य धीराः परिजानन्ति योनिम् । मरीचीनां पदमिच्छन्ति वेधसः । यो देवेभ्य आतपति । यो देवानां पुरोहितः । पूर्वो यो देवेभ्यो जातः । नमो रुचाय ब्राह्मये । रुचं ब्राह्मं जनयन्तः । देवा अग्रे तदब्रुवन् । यस्त्वैवं ब्राह्मणो विद्यात् । तस्य देवा असन् वशे । ह्रीश्च ते लक्ष्मीश्च पत्न्यौ । अहोरात्रे पार्श्वे । नक्षत्राणि रूपम् । अश्विनौ व्यात्तम् । इष्टं मनिषाण । अमुं मनिषाण । सर्वं मनिषाण ॥ २·२ ॥

॥ इति पुरुषसूक्तम् ॥

# ॥ नारायणसूक्तम् ॥

सहस्रशीर्षं देवं विश्वाक्षं विश्वशंभुवम् । विश्वं नारायणं देवमक्षरं परमं पदम् । विश्वतः परमान्नित्यं विश्वं नारायणगं हरिम् । विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति । पतिं विश्वस्यात्मेश्वरगं शाश्वतगं शिवमच्युतम् । नारायणं महाज्ञेयं विश्वात्मानं परायणम् । नारायण-परो ज्योतिरात्मा नारायणः परः । नारायणपरं ब्रह्म तत्त्वं नारायणः परः । नारायणपरो ध्याता ध्यानं नारायणः परः । यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा ॥ १ ॥ अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः । अनन्तमव्ययं कविगं समुद्रेऽन्तं विश्वशंभुवम् ।

प[...] एताम् । क्षेत्राय विष्णुर्मनुषे दशस्यन् । ध्रुवासो अस्य कीरयो न[...] जनासः । उरुक्षितिगं सुजनिमाचकार । त्रिर्देवः पृथिवीमेष एताम् । स[...] विचक्रमे शतर्चसं महित्वा । प्रविष्णुरस्तु तवसस्तवीयान् । त्वेषगंह्यस्य [...] स्थविरस्य नाम ॥

॥ इति विष्णुसूक्तम् ॥

वह्निशिखा अणीयोर्ध्वा व्यवस्थितः । नीलतोयद-मध्यस्था-द्विद्युल्लेखेव भास्वरा । नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा । तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः । स ब्रह्म स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट् ॥

ऋतग्ं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् । ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ॥

ॐ नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात् ।

[illegible]

वशे । ह्रीश्च ते लक्ष्मीश्च पत्न्यौ । अहोरात्रे पार्श्वे । नक्षत्राणि रूपम् । अश्विनौ व्यात्तम् । इष्टं मनिषाण । अमुं मनिषाण । सर्वं मनिषाण ॥ २·२ ॥

॥ इति पुरुषसूक्तम् ॥

# ॥ विष्णुसूक्तम् ॥

विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि यो अस्कंभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः। तदस्य प्रियमभि-पाथो अश्याम्। नरो यत्र देवयवो मदन्ति। उरुक्रमस्य स हि बन्धुरित्था। विष्णोः पदे परमे मध्व उत्सः। प्रतद्विष्णुस्तवते वीर्याय। मृगो न भीमः कुचरो गिरिष्ठाः। यस्योरुषु त्रिषु विक्रमणेषु। अधिक्षियन्ति भुवनानि विश्वा। परो मात्रया तनुवा वृधान। न ते महित्त्वमन्वश्नुवन्ति। उभे ते विद्म रजसी पृथिव्या विष्णो देवत्वम्। परमस्य विथ्से। विचक्रमे पृथिवीमेष एताम्। क्षेत्राय विष्णुर्मनुषे दशस्यन्। ध्रुवासो अस्य कीरयो जनासः। ऊरुक्षितिं सुजनिमाचकार। त्रिर्देवः पृथिवीमेष एताम्। विचक्रमे शतर्चसं महित्वा। प्रविष्णुरस्तु तवसस्तवीयान्। त्वेषंह्यस्य स्थविरस्य नाम ॥

॥ इति विष्णुसूक्तम् ॥

## ॥ श्रीसूक्तम् ॥

हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् । यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥ अश्वपूर्वां रथमध्यां हस्तिनाद-प्रबोधिनीम् । श्रियं देवीमुपह्वये श्रीर्मा देवीर्जुषताम् ॥ कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् । पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥ चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् । तां पद्मिनीमीं शरणमहं प्रपद्य ऽलक्ष्मीर्मे नश्यतां त्वां वृणे ॥ आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः । तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मीः ॥ उपैतु मां देवसखः कीर्तिश्च मणिना सह । प्रादुर्भूतोस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ॥ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् । अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ॥ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरींग् सर्वभूतानां तामिहोपह्वये श्रियम् । मनसः काममाकूतिं वाचः

सत्यमशीमहि । पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥ कर्दमेन प्रजाभूता मयि संभव कर्दम । श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥ आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे । नि च देवीं मातरं श्रियं वासय मे कुले । आर्द्रां पुष्करिणीम् पुष्टिं सुवर्णां हेममालिनीम् । सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ आर्द्रां यः करिणीं यष्टिं पिङ्गलां पद्ममालिनीम् । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह । तां म आवह जातवेदो लक्ष्मी-मनपगामिनीम् । यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान्विन्देयं पुरुषानहम् ॥

यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् । सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत् । पद्मानने पद्म ऊरू पद्माक्षी पद्मसंभवे । तन्मे भजसि पद्माक्षी येन सौख्यं लभाम्यहम् ॥ अश्वदायी गोदायी धनदायी महाधने । धनं मे जुषतां देवि सर्वकामांश्च देहि मे ॥ पद्मानने पद्मविपद्मपत्रे पद्मप्रिये पद्मदलायताक्षि । विश्वप्रिये विश्वमनोऽनुकूले त्वत्पादपद्मं मयि संनिधत्स्व ॥ पुत्रपौत्रधनं धान्यं हस्त्यश्वादिगवे रथम् । प्रजानां

भवसी माता आयुष्मन्तं करोतु मे ॥ धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः । धनमिन्द्रो बृहस्पतिर्वरुणं धनमस्तु ते ॥ वैनतेय सोमं पिब सोमं पिबतु वृत्रहा । सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः ॥ न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः । भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत् ॥ सरसिज-निलये सरोजहस्ते धवलतरांशुक-गन्धमाल्यशोभे । भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥ विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम् । लक्ष्मीं प्रियसखीं देवीं नमाम्यच्युत-वल्लभाम् । महालक्ष्मी च विद्महे विष्णुपत्नी च धीमहि । तन्नो लक्ष्मीः प्रचोदयात् ॥ श्री-र्वर्चस्व-मायुष्य-मारोग्य-माविधाच्छोभमानं महीयते । धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥

[पद्मप्रिये पद्मिनि पद्महस्ते पद्मालये पद्मदलायताक्षि । विश्वप्रिये विष्णुमनोऽनुकूले त्वत्पादपद्मं मयि संनिधत्स्व ॥

श्रिये जात श्रिय आनिर्याय श्रियं वयो जनितृभ्यो दधातु । श्रियं वसाना अमृतत्वमायन् भजन्ति सद्यः सविता विदध्यून् ॥

श्रियं एवैनं तच्छ्रियामादधाति । सन्ततमृचा वषट्कृत्यं सन्धत्तं संधीयते प्रजया पशुभिः । य एवं वेद । ओं महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि । तन्नो लक्ष्मीः प्रचोदयात् ॥)

॥ इति श्रीसूक्तम् ॥

---

## ॥ भूसूक्तम् ॥

भूमिर्भूम्नाद्यौर्वरिणाऽन्तरिक्षं महित्वा । उपस्थे ते देव्यदिते ऽग्निमन्नाद-मन्नाद्यायादधे । आऽयङ्गौः पृश्निरक्रमी दसनन्मातरं पुनः । पितरं च प्रयन्त्सुवः । त्रिंशद्धाम विराजति वाक्पतङ्गाय शिश्रिये । प्रत्यस्य वह द्युभिः । अस्य प्राणादपानत्यन्तश्चरति रोचना । व्यख्यन् महिषः सुवः । यत्त्वा क्रुद्धः परोवपमन्युना यदवर्त्या । सुकल्पमग्ने तत्तव पुनस्त्वोद्दीपयामसि । यत्ते मन्युपरोप्तस्य पृथिवी-मनुदध्वसे । आदित्या विश्वे तद्देवा वसवश्च समाभरन् । मनो

ज्योति र्जुषतामाज्यं विच्छिन्नं यज्ञगं समिमं दधातु। बृहस्पति-स्तनुतामिमं नो विश्वे देवा इह मादयन्ताम् ॥

मेदिनी देवी वसुंधरा स्याद्वसुधा देवी वासवी। ब्रह्मवर्चसः पितृणां श्रोत्रं चक्षुर्मनः। देवी हिरण्यगर्भिणी देवी प्रसोदरी। रसने सत्यायने सीद ॥ समुद्रवती सावित्रीह नो देवी मह्यकी। महाधरणी महोऽर्व्यतिस्थ ॥ शृङ्गे शृङ्गे यज्ञे यज्ञे विभीषणी। इन्द्रपत्नी व्याजनी सुरसित इह ॥ वायुपरी जलशयनी स्वयंधारा सत्यन्धोपरि मेदिनी। सोपरिधत्तङ्गाय ॥ विष्णुपत्नीं महीं देवीं माधवीं माधवप्रियाम्। लक्ष्मी प्रियसखीं देवीं नमाम्यच्युतवल्लभाम् ॥ धनुर्धरायै विद्महे सर्वसिद्ध्यै च धीमहि। तन्नो धरा प्रचोदयात् ॥ इक्षुशालि-यव-सस्य-फलाढ्यां-पारिजात-तरुशोभितमूले। स्वर्ण-रत्न-मणि मण्डपमध्ये चिन्तयेत् सकललोक-धरित्रीम् ॥ श्यामां विचित्रां नवरत्न-भूषितां चतुर्भुजां तुङ्गपयोधरान्विताम्। इन्दीवराक्षीं नवशालीमञ्जरीं शुकं दधानां वसुधां भजामहे ॥ सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत। अत्रासखायः सख्यानि जानते भद्रैषां लक्ष्मी-र्निहिताऽधिवाचि ॥

ओं शान्तिः शान्तिः शान्तिः ॥

॥ इति भूसूक्तम् ॥

---

## ॥ नीळासूक्तम् ॥

नीळां देवीगं शरणमहं प्रपंद्ये। गृणाहि। घृतवती सवितराधि-पत्यैः पयस्वतीरन्तिराशानो अस्तु। ध्रुवा दिशां विष्णुपत्न्यघोराऽस्ये-शानासहसोया मनोता। बृहस्पतिर्मातरिश्वोत वायुस्सन्धुवानावाता अभि नो गृणन्तु। विष्टम्भो दिवोधरुणः पृथिव्या अस्येशाना जगतो विष्णुपत्नी ॥

॥ इति नीळासूक्तम् ॥

---

## ॥ दुर्गासूक्तम् ॥

जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः। स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥ तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम्। दुर्गां देवीगं-शरणमहं प्रपद्ये सुतरसितरसे नमः ॥ अग्ने त्वं पारया नव्यो अस्मान्स्वस्तिभिरति दुर्गाणि विश्वा। पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः ॥ विश्वानि नो दुर्गहा जातवेदः

सिन्धुन्न नावा दुरितातिपर्षि । अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम् ॥ पृतनाजितगं सहमानमुग्रमग्निगं हुवेम परमात्सधस्थात् । स नः पर्षदतिदुर्गाणि विश्वाक्षामद्देवो अति दुरितात्यग्निः ॥ प्रत्नोषिकमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि । स्वाञ्चाग्ने तनुवं पिप्रयस्वास्मभ्यं च सौभगमायजस्व ॥ गोभिर्जुष्टमयुजो निषिक्तं तवेन्द्र विष्णो-रनुसंचरेम । नाकस्य पृष्ठमभि-संवसानो वैष्णवीं लोक इह मादयन्ताम् ॥

॥ इति दुर्गासूक्तम् ॥ ४०

## ॥ भाग्यसूक्तम् ॥

प्रातरग्निं प्रातरिन्द्रगं हवामहे प्रातर्मित्रा वरुणा प्रातरश्विना । प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातस्सोममुत रुद्रगं हुवेम ॥ १ ॥ प्रातर्जितं भगमुग्रगं हुवेम वयं पुत्र-मदितेर्यो विधर्ता । आद्ध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यंभगं भक्षीत्याह ॥ २ ॥ भग प्रणेत-र्भग

सत्यराधो भगेमां धियमुदवददन्नः । भगप्रणो जनय गोभि-रश्वै-र्भगप्रनृभि-र्नृवन्तस्स्याम ॥ ३ ॥ उतेदानीं भगवन्तस्यामोत प्रपित्व उत मध्ये अह्नां । उतोदिता मघवन् सूर्यस्य वयं देवानागुं सुमतौ स्याम ॥ ४ ॥ भग एव भगवागुं अस्तु देवास्तेन वयं भगवन्तस्स्याम । तं त्वा भग सर्व इज्जोहवीमि सनो भग पुर एता भवेह ॥ ५ ॥ समध्वरायोषसोऽनमन्त दधिक्रावेव शुचये पदाय । अर्वाचीनं वसुविदं भगन्नो रथमिवाश्वावाजिन आवहन्तु ॥ ६ ॥ अश्वावती-र्गोमती-र्न उषासो वीरवतीसदं-मुच्छन्तु भद्राः । घृतं दुहाना विश्वतः प्रपीनायूयं पात स्वस्तिभिस्सदा नः ॥ ७ ॥ यो माऽग्ने भागिनगुं सन्त-मथाभागं चिकीऋषति । अभागमग्ने तं कुरु मामग्ने भागिनं कुरु ॥ ८ ॥

॥ इति भाग्यसूक्तम् ॥

---

## ॥ ऋग्वेदीय देवीसूक्तम् ॥

अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः । अहं मित्रा-वरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा ॥ १ ॥ अहं सोममाहनसं

बिभर्म्यहं त्वष्टारमुत पूषणं भगम् । अहं दधामि द्रविणं हविष्मते सुप्राव्ये३ यजमानाय सुन्वते ॥ २ ॥ अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् । तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तीम् ॥ ३ ॥ मया सो अन्नमत्ति यो विपश्यति यः प्राणिति य ईं शृणोत्युक्तम् । अमन्तवोमान्त उपक्षियन्ति श्रुधिश्रुत श्रद्धिवं ते वदामि ॥ ४ ॥ अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः । यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम् ॥ ५ ॥ अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवेहन्त वा उ । अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आविवेश ॥ ६ ॥ अहं सुवे पितरमस्य मूर्धन् मम योनि-रप्स्व१न्तः समुद्रे । ततो वितिष्ठे भुवनानु विश्वो तामूं द्यां वर्ष्मणोपस्पृशामि ॥ ७ ॥ अहमेव वात इव प्रवाम्यारभमाणा भुवनानि विश्वा । परो दिवा पर एना पृथिव्यै तावती महिना संबभूव ॥ ८ ॥

॥ इति देवीसूक्तम् ॥

# ॥ ऋग्वेदीय रात्रिसूक्तम् ॥

ओं रात्री व्यख्यदायती पुरुत्रा देव्य (अ)क्षभिः । विश्वा अधिश्रियोधित ॥ १ ॥ ओर्वप्रा अमर्त्या निवतो देव्यु (उ)द्वतः । ज्योतिषा बाधते तमः ॥ २ ॥ निरुस्वसारमस्कृतोषसं देव्यायती । अपेदु हासते तमः ॥ ३ ॥ सा नो अद्ययस्या वयं निते यामन्नविक्ष्महि । वृक्षेन वसतिं वयः ॥ ४ ॥ नि ग्रामासो अविक्षत नि पद्वन्तो नि पक्षिणः । निश्येनासश्चिदर्थिनः ॥ ५ ॥ यावया वृक्य (अं)वृकं यवयस्तेन-मूर्म्ये । अथा नः सुतरा भव ॥ ६ ॥ उपमा पेपिशत्तमः कृष्णं व्यक्तमस्थित । उष ऋणेव यातय ॥ ७ ॥ उप ते गा इवाकरं वृणीष्व दुहित-र्दिवः । रात्रिस्तोमं न जिग्युषे ॥ ८ ॥

॥ इति रात्रिसूक्तम् ॥

## ॥ पवमानसूक्तम् ॥

### (पुण्याहवाचनम्)

हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः। अग्निं या गर्भं दधिरे विरूपास्तान आपश्शगं स्योना भवन्तु ॥ यासागं राजा वरुणो याति मध्ये सत्यानृते अवपश्यं जनानाम्। मधुश्चुतश्शुचयो याः पावकास्ता न आपश्शगं स्योना भवन्तु ॥ यासां देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति। याः पृथिवीं पयसोन्दन्ति शुक्रास्ता न आपश्शगं स्योना भवन्तु ॥ शिवेन मा चक्षुषा पश्यतापश्शिवया तनुवोप स्पृशत त्वचं मे। सर्वागं अग्नीगं रप्सुषदो हुवे वो मयि वर्चो बलमोजो निधत्त ॥

पवमानस्सुवर्जनः। पवित्रेण विचर्षणिः। यः पोता स पुनातु मा। पुनन्तु मा देवजनाः। पुनन्तु मनवो धिया। पुनन्तु विश्व आयवः। जातवेदः पवित्रवत्। पवित्रेण पुनाहि मा। शुक्रेण देवदीद्यत्। अग्ने क्रत्वा क्रतूगं रनु। यत्ते पवित्रमर्चिषि। अग्ने विततमन्तरा। ब्रह्म तेन पुनीमहे। उभाभ्यां देवसवितः। पवित्रेण सवेन च। इदं ब्रह्म पुनीमहे ॥ वैश्वदेवी पुनती देव्यागात्। यस्यै बह्वीस्तनुवो वीतपृष्ठाः।

तया मदन्तः सधमाद्येषु । वयगं स्याम पतयो रयीणाम् । वैश्वानरो रश्मिभि-र्मा पुनातु । वातः प्राणेनेषिरो मयो भूः । द्यावापृथिवी पयसा पयोभिः । ऋतावरी यज्ञिये मा पुनीताम् । बृहद्भिः सवितस्तृभिः । वर्षिष्ठै-र्देवमन्मभिः । अग्ने दक्षैः पुनाहि मा । येन देवा अपुनत । येनापो दिव्यंकशः । तेन दिव्येन ब्रह्मणा । इदं ब्रह्म पुनीमहे । यः पावमानीरध्येति । ऋषिभि-स्संभृतगं रसम् । सर्वगं स पूतमश्नाति । स्वदितं मातरिश्वना । पावमानीर्यो अध्येति । ऋषिभिस्संभृतगं रसम् । तस्मै सरस्वती दुहे । क्षीरगं सर्पि-र्मधूदकम् ॥ पावमानीस्स्वस्त्ययनीः । सुदुघाहि पयस्वतीः । ऋषिभिस्संभृतो रसः । ब्राह्मणेष्वमृतगं हितम् ॥ पावमानीर्दिशन्तु नः । इमं लोकमथो अमुम् । कामान् समर्धयन्तु नः । देवी-र्देवैः समाभृताः । पावमानीस्स्वस्त्ययनीः । सुदुघाहि घृतश्चुतः । ऋषिभिः संभृतो रसः । ब्राह्मणेष्वमृतगं हितम् । येन देवाः पवित्रेण । आत्मानं पुनते सदा । तेन सहस्रधारेण । पावमान्यः पुनन्तु मा । प्राजापत्यं पवित्रम् । शतोद्यामगं हिरण्मयम् ।

तेन॑ ब्रह्म॒ विदो॑ व॒यम् । पू॒तं ब्रह्म॑ पुनीमहे । इन्द्र॑स्सुनी॒ती स॒हमा॑ पुनातु । सोम॑स्स्व॒स्त्या वरु॑णस्स॒मीच्या᳚ । य॒मो राजा᳚ प्रमृ॒णाभि॑ः पुनातु मा । जा॒तवे॑दा मो॒र्जय॑न्त्या पुनातु । भूर्भुव॒स्सुवः॑ ॥

तच्छं॒ योरावृ॑णीमहे । गा॒तुं य॒ज्ञाय॑ । गा॒तुं य॒ज्ञप॑तये । दैवी᳚स्स्व॒स्तिर॑स्तु नः । स्व॒स्तिर्मानु॑षेभ्यः । ऊ॒र्ध्वं जि॑गातु भेष॒जम् । शन्नो॑ अस्तु द्वि॒पदे᳚ । शं चतु॑ष्पदे । ओं शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥

॥ इति पवमानसूक्तम् ॥

---

## ॥ मेधासूक्तम् ॥

मे॒धा दे॒वी जु॒षमा॑णा न॒ आगा᳚द्वि॒श्वाची॑ भ॒द्रा सु॑मन॒स्यमा॑ना । त्वया॒ जुष्टा॑ जु॒षमा॑णा दु॒रुक्ता᳚न् बृ॒हद्व॑देम वि॒दथे॑ सु॒वीराः᳚ ॥ त्वया॒ जुष्ट॑ ऋ॒षिर्भ॑वति देवि॒ त्वया॒ ब्रह्मा॑ग॒तश्री॑रु॒त

त्वयि । त्वया जुष्टश्चित्रं विन्दते वसु सा नो जुषस्व द्रविणो न मेधे ॥
मेधां म इन्द्रो ददातु मेधां देवी सरस्वती । मेधां मे अश्विना
वुभावाधत्तां पुष्करस्रजा ॥ अप्सरासु च या मेधा गन्धर्वेषु च
यन्मनः । दैवी मेधा मनुष्यजा सा मां मेधा सुरभिर्जुषताम् ॥
आमां मेधा सुरभिर्विश्वरूपा हिरण्यवर्णा जगती जगम्या । ऊर्जस्वती
पयसा पिन्वमाना सा मां मेधा सुप्रतीका जुषन्ताम् ॥

॥ इति मेधासूक्तम् ॥

---

## ॥ आयुष्यसूक्तम् ॥

योे ब्रह्मा ब्रह्मण उज्जहार* प्राणैः शिरः कृत्तिवासाः पिनाकी ।
ईशानो देवः स न आयुर्दधातु तस्मै जुहोमि हविषा घृतेन ॥ १ ॥

विभ्राजमानः सरिरस्य मध्या-द्रोचमानो घर्मरुचिर्य आगात् ।
स मृत्युपाशानपनुद्य घोरानिहायुषेणो घृतमत्तु देवः ॥ ॥ २ ॥

*उज्जभार

ब्रह्मज्योति-र्ब्रह्म-पत्नीषु गर्भं यमादधात् पुरुरूपं जयन्तम् ।
सुवर्णरं भग्रह-मर्कमर्च्यं तमायुषे वर्धयामो घृतेन ॥ ॥ ३ ॥

श्रियं लक्ष्मी-मौबला-मंबिकां गां षष्ठीं च यामिन्द्रसेनेत्युदाहुः ।
तां विद्यां ब्रह्मयोनिं सरूपामिहायुषे तर्पयामो घृतेन ॥ ॥ ४ ॥

दाक्षायण्यः सर्वयोन्यः सु योन्यः सहस्रशो विश्वरूपा विरूपाः ।
ससूनवः सपतयः सयूथ्या आयुषेणो घृतमिदं जुषन्ताम् ॥ ॥ ५ ॥

दिव्या गणा बहुरूपाः पुराणा आयुश्छिदो नः प्रमथ्नन्तु वीरान् । तेभ्यो जुहोमि बहुधा घृतेन मा नः प्रजागं रीरिषो मोत वीरान् ॥ ॥ ६ ॥

एकः पुरस्तात् य इदं बभूव यतो बभूव भुवनस्य गोपाः ।
यमप्येति भुवनगं सांपराये स नो हविर्घृत-मिहायुषेऽस्तु देवः ॥ ॥ ७ ॥

वसून् रुद्रा-नादित्यान् मरुतोऽथ साध्यान् ऋभून् यक्षान् गन्धर्वांश्च पितॄंश्च विश्वान् । भृगून् सर्पांश्चांगिरसोथ सर्वान् घृतं हुत्वा स्वायुष्या महयाम शश्वत् ॥ ॥ ८ ॥

॥ इति आयुष्यसूक्तम् ॥

# ॥ नक्षत्रसूक्तम् ॥

अग्निर्नः पातु कृत्तिकाः । नक्षत्रं देवमिन्द्रियम् । इदमासां विचक्षणम् । हविरासं जुहोतन । यस्य भान्ति रश्मयो यस्य केतवः । यस्येमा विश्वा भुवनानि सर्वा । सकृत्तिकाभि-रभिसंवसानः । अग्निर्नो देवस्सुविते दधातु ॥ १ ॥

प्रजापते रोहिणीवेतु पत्नी । विश्वरूपा बृहती चित्रभानुः । सा नो यज्ञस्य सुवि ते दधातु । यथा जीवेम शरदस्सवीराः । रोहिणी देव्युदगात्पुरस्तात् । विश्वा रूपाणि प्रतिमोदमाना । प्रजापतिग्ं हविषा वर्धयन्ती । प्रिया देवाना-मुपयातु यज्ञम् ॥ २ ॥

सोमो राजा मृगशीर्षेण आगन् । शिवं नक्षत्रं प्रियमस्य धाम । आप्यायमानो बहुधा जनेषु । रेतः प्रजां यजमाने दधातु । यत्ते नक्षत्रं मृगशीर्षमस्ति । प्रियग्ं राजन् प्रियतमं प्रियाणाम् । तस्मै ते सोम हविषा विधेम । शन्न एधि द्विपदे शं चतुष्पदे ॥ ३ ॥

आर्द्रया रुद्रः प्रथमा न एति । श्रेष्ठो देवानां पतिरघ्नियानाम् । नक्षत्रमस्य हविषा विधेम । मानः प्रजाग्ं रीरिषन्मोत वीरान् । हेती

रुद्रस्य परिणो वृणक्तु । आर्द्रा नक्षत्रं जुषतागं हविर्नः । प्रमुंचमानौ दुरितानि विश्वा । अपाघशगंसन्नुदतामरातिम् ॥ ४ ॥

पुनर्नो देव्यदितिस्स्पृणोतु । पुनर्वसून: पुमरेतां यज्ञम् । पुनर्नो देवा अभियन्तु सर्वे । पुनः पुनर्वो हविषा यजामः । एवा न देव्यदितिरनर्वा । विश्वस्य भर्त्री जगतः प्रतिष्ठा । पुनर्वसू हविषा वर्धयन्ती । प्रियं देवाना-मप्येतु पाथः ॥ ५ ॥

बृहस्पतिः प्रथमं जायमानः । तिष्यं नक्षत्रमभिसंबभूव । श्रेष्ठो देवानां पृतनासुजिष्णुः । दिशो नु सर्वा अभयन्नो अस्तु । तिष्यः पुरस्तादुत मध्यतो नः । बृहस्पतिर्नः परिपातु पश्चात् । बाधेतान्द्वेषो अभयं कृणुताम् । सुवीर्यस्य पतयस्स्याम ॥ ६ ॥

इदगं सर्पेभ्यो हविरस्तु जुष्टम् । आश्रेषायेषा मनुयन्ति चेतः । ये अन्तरिक्षं पृथिवीं क्षियन्ति । तेनस्सर्पासो हवमागमिष्ठाः । ये रोचने सूर्यस्यापि सर्पाः । ये दिवं देवीमनुसंचरन्ति । येषा माश्रेषा अनुयन्ति कामम् । तेभ्यस्सर्पेभ्यो मधुमज्जुहोमि ॥ ७ ॥

उपहूताः पितरो ये मघासु। मनोजवसस्सुकृतस्सुकृत्याः। ते नो नक्षत्रे हव मागमिष्ठाः। स्वधाभिर्यज्ञं प्रयतं जुषन्ताम्। ये अग्निदग्धा येऽनग्निदग्धाः। येऽमुल्लोकं पितरः क्षियन्ति। यागुंश्च विद्मयागुं उ च न प्रविद्म। मघासु यज्ञगुं सुकृतं जुषन्ताम्॥ ८॥

गवां पतिः फल्गुनीनामसि त्वम्। तदर्यमन् वरुणमित्र चारु। तं त्वा वयꣳ सनितारꣳ सनीनाम्। जीवा जीवन्तमुपसंविशेम। येनेमा विश्वा भुवनानि संजिता। यस्य देवा अनुसंयन्ति चेतः। अर्यमा राजाऽजरस्तु विष्मान्। फल्गुनीनामृषभो रोरवीति॥ ९॥

श्रेष्ठो देवानां भगवो भगासि। तत्त्वा विदुः फल्गुनीस्तस्य वित्तात्। अस्मभ्यं क्षत्रमजरगुं सुवीर्यम्। गोमदश्ववदुपसन्नुदेह। भगोह दाता भग इत्प्रदाता। भगो देवीः फल्गुनीराविवेश। भगस्येत्तं प्रसवं गमेम। यत्र देवैस्सधमादं मदेम॥ १०॥

आयातु देवस्सवितोप यातु। हिरण्ययेन सुवृता रथेन। वहन् हस्तगुं सुभगं विद्मनापसम्। प्रयच्छन्तं पपुरिं पुण्यमच्छ।

हस्तः प्रयच्छ त्वमृतं वसीयः। दक्षिणेन प्रतिगृभ्णीम एनत्।
दातारमद्य सविता विदेय। यो नो हस्ताय प्रसुवाति यज्ञम्॥ ११॥

त्वष्टा नक्षत्रमभ्येति चित्राम्। सुभगं ससंयुवतिं रोचमानाम्।
निवेशयन्नमृतान्मर्त्यांश्च। रूपाणि पिंशन् भुवनानि विश्वा।
तन्नस्त्वष्टा तदु चित्रा विचष्टाम्। तन्नक्षत्रं भूरिदा अस्तु मह्यम्।
तन्नः प्रजां वीरवतीं सनोतु। गोभिर्नो अश्वैस्समनक्तु यज्ञम्॥ १२॥

वायुर्नक्षत्रमभ्येति निष्ट्याम्। तिग्मशृङ्गो वृषभो रोरुवाणः।
समीरयन् भुवना मातरिश्वा। अप द्वेषांसि नुदतामरातीः। तन्नो
वायुस्तदु निष्ट्या शृणोतु। तन्नक्षत्रं भूरिदा अस्तु मह्यम्। तन्नो
देवासो अनु जानन्तु कामम्। यथा तरेम दुरितानि विश्वा॥ १३॥

दूरमस्मच्छत्रवो यन्तु भीताः। तदिन्द्राग्नी कृणुतां तद्विशाखे।
तन्नो देवा अनुमदन्तु यज्ञम्। पश्चात् पुरस्तादभयन्नो अस्तु।
नक्षत्राणामधि पत्नी विशाखे। श्रेष्ठाविन्द्राग्नी भुवनस्य गोपौ।
विषूचश्शत्रूनपबाधमानौ। अपक्षुधन्नुदतामरातिम्॥ १४॥

पूर्णा पश्चादुत पूर्णा पुरस्तात् । उन्मध्यतः पौर्णमासी जिगाय । तस्यां देवा अधिसंवसन्तः । उत्तमे नाक इह मादयन्ताम् । पृथ्वी सुवर्चा युवतिः सजोषाः । पौर्णमास्युदगाच्छोभमाना । आप्याययन्ती दुरितानि विश्वा । उरुं दुहां यजमानाय यज्ञम् ॥ १५ ॥

ऋद्ध्यास्म हव्यैर्नमसोपसद्य । मित्रं देवं मित्रधेयं नो अस्तु । अनूराधान् हविषा वर्धयन्तः । शतं जीवेम शरदः सवीराः । चित्रं नक्षत्रमुदगात्पुरस्तात् । अनूराधा स इति यद्वदन्ति । तन्मित्र एति पथिभिर्देवयानैः । हिरण्ययै-र्विततै-रन्तरिक्षे ॥ १६ ॥

इन्द्रो ज्येष्ठामनु नक्षत्रमेति । यस्मिन् वृत्रं वृत्र तूर्ये ततार । तस्मिन्वय-ममृतं दुहानाः । क्षुधन्तरेम दुरितिं दुरिष्टिम् । पुरन्दराय वृषभाय धृष्णवे । अषाढाय सहमानाय मीढुषे । इन्द्राय ज्येष्ठा मधुमद्दुहाना । उरुं कृणोतु यजमानाय लोकम् ॥ १७ ॥

मूलं प्रजां वीरवतीं विदेय । परा च्येतु निर्ऋतिः पराचा । गोभिर्नक्षत्रं पशुभिः समक्तम् । अहर्भूयाद्यजमानाय मह्यम् । अहर्नो अद्य सुविते दधातु । मूलं नक्षत्रमिति यद्वदन्ति । पराचीं वाचा निर्ऋतिं नुदामि । शिवं प्रजायै शिवमस्तु मह्यम् ॥ १८ ॥

या दिव्या आपः पयसा संबभूवुः । या अन्तरिक्ष उत पार्थिवीर्याः । यासा-मषाढा अनुयन्ति कामम् । ता न आपः शग् स्योना भवन्तु । याश्च कूप्या याश्च नाद्यास्समुद्रियाः । याश्च वैशन्तीरुत प्रासचीर्याः । यासामषाढा मधु भक्षयन्ति । ता न आपः शग् स्योना भवन्तु ॥ १९ ॥

तन्नो विश्वे उप शृण्वन्तु देवाः । तदषाढा अभिसंयन्तु यज्ञम् । तन्नक्षत्रं प्रथतां पशुभ्यः । कृषिर्वृष्टि र्यजमानाय कल्पताम् । शुभ्राः कन्या युवतयस्सुपेशसः । कर्मकृत-स्सुकृतो वीर्यावतीः । विश्वान् देवान् हविषा वर्धयन्तीः । अषाढाः काममुपयान्तु यज्ञम् ॥ २० ॥

यस्मिन् ब्रह्माभ्यजयत्सर्वमेतत् । अमुंच लोक-मिदमूच सर्वम् । तन्नो नक्षत्र-मभिजिद्विजित्य । श्रियं दधात्वहृणीयमानम् । उभौ लोकौ ब्रह्मणा संजितेमौ । तन्नो नक्षत्रमभिजिद्विचष्टाम् । तस्मिन्वयं पृतनास्संजयेम । तन्नो देवासो अनु जानन्तु कामम् ॥ २१ ॥

शृण्वन्ति श्रोणा-ममृतस्य गोपाम् । पुण्यामस्या उपशृणोमि वाचम् । महीं देवीं विष्णुपत्नीमजूर्याम् । प्रतीचीमेनाग् हविषा यजामः ।

त्रेधा विष्णु-रुरुगायो विचक्रमे । मही दिवं पृथिवी-मन्तरिक्षम् । तच्छ्रोणैति श्रव इच्छमाना । पुण्यग्ं श्लोकं यजमानाय कृण्वती ॥ २२ ॥

अष्टौ देवा वसवस्सोम्यासः । चतस्रो देवी-रजराः श्रविष्ठाः । ते यज्ञं पान्तु रजसः पुरस्तात् । संवत्सरीण-ममृतग्ं स्वस्ति । यज्ञं नः पान्तु वसवः पुरस्तात् । दक्षिणतोऽभियन्तु श्रविष्ठाः । पुण्यन्नक्षत्र-मभिसंविशाम । मा नो अराति-रघशग्ंसाऽगन् ॥ २३ ॥

क्षत्रस्य राजा वरुणोऽधिराजः । नक्षत्राणाग्ं शतभिषग्वसिष्ठः । तौ देवेभ्यः कृणुतो दीर्घमायुः । शतग्ं सहस्रा भेषजानि धत्तः । यज्ञन्नो राजा वरुण उपयातु । तन्नो विश्वे अभि संयन्तु देवाः । तन्नो नक्षत्रग्ं शतभिषग्जुषाणम् । दीर्घमायुः प्रतिरद्भेषजानि ॥ २४ ॥

अज एकपादुदगात्पुरस्तात् । विश्वा भूतानि प्रतिमोदमानः । तस्य देवाः प्रसवं यन्ति सर्वे । प्रोष्ठपदासो अमृतस्य गोपाः । विभ्राजमानस्समिधा न उग्रः । आऽन्तरिक्षमरुहदगन्द्याम् । तग्ं सूर्यं देव-मजमेकपादम् । प्रोष्ठपदासो अनुयन्ति सर्वे ॥ २५ ॥

अहिर्बुध्नियः प्रथमा न एति । श्रेष्ठो देवानामुत मानुषाणाम् । तं ब्राह्मणास्सोमपास्सोम्यासः । प्रोष्ठपदासोअभिरक्षन्ति सर्वे । चत्वार एकमभि कर्म देवाः । प्रोष्ठपदा स इति यान्वदन्ति । ते बुध्नियं परिषद्यगं स्तुवन्तः । अहिगं रक्षन्ति नमसोपसद्य ॥ २६ ॥

पूषा रेवत्यन्वेति पन्थाम् । पुष्टिपती पशुपा वाजबस्त्यौ । इमानि हव्या प्रयताजुषाणा । सुगैर्नोयानैरुपयातां यज्ञम् । क्षुद्रान् पशून् रक्षतु रेवती नः । गावो नो अश्वागं अन्वेतु पूषा । अन्नगं रक्षन्तौ बहुधा विरूपम् । वाजगं सनुतां यजमानाय यज्ञम् ॥ २७ ॥

तदश्विनावश्वयुजोपयाताम् । शुभंगमिष्ठौ सुयमेभिरश्वैः । स्वंनक्षत्रगं हविषा यजन्तौ । मध्वासंपृक्तौ यजुषा समक्तौ । यौ देवानां भिषजौ हव्यवाहौ । विश्वस्य दूता-वमृतस्य गोपौ । तौ नक्षत्रं जुजुषाणोपयाताम् । नमोऽश्विभ्यां कृणुमोऽश्वयुग्भ्याम् ॥ २८ ॥

अप पाप्मानं भरणीर्भरन्तु । तद्यमो राजा भगवान् विचष्टाम् । लोकस्य राजा महतो महान् हि । सुगं नः पन्थामभयं कृणोतु । यस्मिन्नक्षत्रे यम एति राजा । यस्मिन्नेन-मभ्यषिंचन्त देवाः । तदस्य चित्रगं हविषा यजाम । अप पाप्मानं भरणीर्भरन्तु ॥ २९ ॥

निवेशनी संगमनी वसूनां विश्वा रूपाणि वसून्यावेशयन्ती। सहस्र-पोषगुं सुभगा रराणा सा न आगन्वर्चसा संविदाना। यत्ते देवा अदधुर्भागधेयममावास्ये संवसन्तो महित्वा। सा नो यज्ञं पिपृहि विश्ववारे रयिन्नो धेहि सुभगे सुवीरम् ॥ ३० ॥

॥ इति नक्षत्रसूक्तम् ॥

—0—

## ॥ शान्तिपञ्चकम् ॥

शं नो मित्रः शं वरुणः। शं नो भवत्वर्यमा। शं न इन्द्रो बृहस्पतिः। शं नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। *त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु माम्। अवतु वक्तारम्। ओं शान्तिः शान्तिः शान्तिः ॥

शं नो मित्रः शं वरुणः। शं नो भवत्वर्यमा। शं न इन्द्रो बृहस्पतिः। शं नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्मावादिषम्।

---

* त्वमेव

ऋतमवादिषम् । सत्यमवादिषम् । तन्मामावीत् । तद्वक्तारमावीत् । आवीन्माम् । आवीद्वक्तारम् ॥ ओं शान्तिः शान्तिः शान्तिः ॥

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै ॥ ओं शान्तिः शान्तिः शान्तिः ॥

नमो वाचे या चोदिता या चानुदिता तस्यै वाचे नमो नमो वाचे नमो वाचस्पतये नम ऋषिभ्यो मन्त्रकृद्भ्यो मन्त्रपतिभ्यो मा मामृषयो मन्त्रकृतो मन्त्रपतयः परादुर्माऽहमृषीन्मन्त्रकृतो मन्त्रपतीन्परादां वैश्वदेवीं वाचमुद्यासग्ं शिवामदस्ताञ्जुष्टां देवेभ्यः शर्म मे द्यौः शर्म पृथिवी शर्म विश्वमिदं जगत् । शर्म चन्द्रश्च सूर्यश्च शर्म ब्रह्मप्रजापती । भूतं वदिष्ये भुवनं वदिष्ये तेजो वदिष्ये यशो वदिष्ये तपो वदिष्ये ब्रह्म वदिष्ये सत्यं वदिष्ये तस्मा अहमिदमुपस्तरण-मुपस्तृण उपस्तरणं मे प्रजायै पशूनां भूयादुपस्तरणमहं प्रजायै पशूनां भूयासं प्राणापानौ मृत्योर्मापातं प्राणापानौ मा मा हासिष्टं मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासँ

शुश्रूषेण्यां मनुष्येभ्यस्त्वं मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु ॥

ओं शान्तिः शान्तिः शान्तिः ॥

तच्छं योरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवीः स्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शं नो अस्तु द्विपदे । शं चतुष्पदे । ओं शान्तिः शान्तिः शान्तिः ॥

॥ इति शान्तिपञ्चकम् ॥

---

## ॥ सन्ध्यावन्दनम् ॥

ओं । अच्युताय नमः । अनन्ताय नमः । गोविन्दाय नमः । केशव नारायण माधव गोविन्द विष्णो मधुसूदन त्रिविक्रम वामन श्रीधर हृषीकेश पद्मनाभ दामोदर ॥ १ ॥

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

ओं भूः । ओं भुवः । ओꣳ सुवः । ओं महः । ओं जनः । ओं तपः । ओꣳ सत्यम् । ओं तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥ ओमापो ज्योती रसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम् ॥

ममोपात्त-समस्त-दुरित-क्षयद्वारा श्रीपरमेश्वर-प्रीत्यर्थं प्रातः सन्ध्यामुपासिष्ये (माध्याह्निकं करिष्ये, सायंसन्ध्यामुपासिष्ये) ॥ २ ॥

ओं श्रीकेशवाय नमः । आपोहिष्ठा मयो मुवः । ता न ऊर्जे दधातन । महे रणाय चक्षसे । यो वः शिवतमो रसः । तस्य भाजयतेह नः । उशतीरिव मातरः । तस्मा अरं गमाम वः । यस्य क्षयाय जिन्वथ । आपो जनयथा च नः । ओं भूर्भुवस्सुवः ॥ ३ ॥

सूर्यश्च मामन्युश्च मन्युपतयश्च मन्युकृतेभ्यः । पापेभ्यो रक्षन्ताम् । यद्रात्रिया पापमकार्षम् । मनसा वाचा हस्ताभ्याम् । पद्भ्यामुदरेण शिश्ना । रात्रिस्तदवलुम्पतु । यत्किंच दुरितं मयि । इदमहं माममृत योनौ । सूर्ये ज्योतिषि जुहोमि स्वाहा ॥ ४ ॥

आपः पुनन्तु पृथिवीं पृथिवी पूता पुनातु माम् । पुनन्तु ब्रह्मणस्पति-र्ब्रह्म पूता पुनातु माम् । यदुच्छिष्टमभोज्यं यद्वा दुश्चरितं मम । सर्वं पुनन्तु मामापो ऽसतां च प्रतिग्रहꣳ स्वाहा ॥ ५ ॥

अग्निश्च मामन्युश्च मन्युपतयश्च मन्युकृतेभ्यः । पापेभ्यो रक्षन्ताम् । यदह्ना पाप-मकार्षम् । मनसा वाचा हस्ताभ्याम् । पद्भ्या-

मुदरेण शिक्षा। अहस्तदवलुम्पतु। यत्किञ्च दुरितं मयि। इदमहं माममृतयोनौ। सत्ये ज्योतिषि जुहोमि स्वाहा॥ ६॥

दधिक्राविण्णो अकारिषम्। जिष्णोरश्वस्य वाजिनः। सुरभिनो मुखाकरत्। प्रण आयूंषि तारिषत्॥ आपो हिष्ठा+आपो जनयथा च नः॥ ओं भूर्भुवस्सुवः॥ ७॥

ओं भूर्भुवस्सुवः+धियो यो नः प्रचोदयात्॥ असावादित्यो ब्रह्म। ब्रह्मैवाहमस्मि॥ ८॥

आदित्यं तर्पयामि। सोमं तर्पयामि। अंगारकं। बुधं। बृहस्पतिं। शुक्रं। शनैश्चरं। राहुं। केतुम्। केशवं। नारायणं। माधवं। गोविन्दं। विष्णुं। मधुसूदनं। त्रिविक्रमं। वामनं। श्रीधरं। हृषीकेशं। पद्मनाभं। दामोदरं तर्पयामि॥ ९॥

शुक्लाम्बरधरं+शान्तये। ओं भूः+भूर्भुवस्सुवरोम्॥

ममोपात्त+प्रीत्यर्थं प्रातः सन्ध्या-गायत्री-महामन्त्रजपं करिष्ये (माध्याह्निक गायत्री, सायं सन्ध्या-गायत्री महामन्त्रजपं करिष्ये)॥१०॥

प्रणवस्य ऋषिर्ब्रह्मा, देवी-गायत्रीच्छन्दः, परमात्मा देवता। भूरादि-सप्त-व्याहृतीनां अत्रि-भृगु-कुत्स-वसिष्ठ-गौतम-काश्यप-आंगीरस-ऋषयः। गायत्री-उष्णिक्-अनुष्टुप्-बृहती-पंक्ती-तृष्टुप्-जगत्यश्छन्दांसि। अग्नि-वायु-अर्क-वागीश-वरुणेन्द्र-विश्वेदेवा देवताः॥

ओं भूः + भूर्भुवस्सुवरोम् ॥ ११ ॥

आयात्वित्यनुवाकस्य वामदेव ऋषिः । अनुष्टुप् छन्दः । गायत्री देवता ॥

आयातु वरदा देवी अक्षरं ब्रह्मसम्मितम् । गायत्रीं छन्दसां मातेदं ब्रह्म जुषस्व नः । ओजोऽसि सहोऽसि बलमसि भ्राजोऽसि देवानां धाम नामासि विश्वमसि विश्वायुः सर्वमसि सर्वायु-रभिभूरों गायत्रीमावाहयामि सावित्रीमावाहयामि सरस्वतीमावाहयामि ॥ १२ ॥

सावित्र्या ऋषि-र्विश्वामित्रः, निचृद्गायत्री छन्दः, सविता देवता ॥ (तत्सवितुर्वरेण्यं इति बीजम् । धियो यो नः प्रचोदयात् इति शक्तिः । भर्गो देवस्य धीमहि इति कीलकम् । मम श्रीगायत्री प्रसादसिद्ध्यर्थे जपे विनियोगः ।

करन्यासः—तत्सवितु-र्ब्रह्मात्मने अंगुष्ठाभ्यां नमः । वरेण्यं विष्ण्वात्मने तर्जनीभ्यां नमः । भर्गो देवस्य रुद्रात्मने मध्यमाभ्यां नमः । धीमहि ईश्वरात्मने अनामिकाभ्यां नमः । धियो यो नः सदाशिवात्मने कनिष्ठिकाभ्यां नमः । प्रचोदयात् परमात्मने करतल-करपृष्ठाभ्यां नमः ॥

अंगन्यासः—तत्सवितुर्ब्रह्मात्मने हृदयाय नमः । वरेण्यं विष्ण्वात्मने शिरसे स्वाहा । भर्गोदेवस्य रुद्रात्मने शिखायै वषट् ।

धीमहि ईश्वरात्मने कवचाय हुं । धियो यो नः सदाशिवात्मने नेत्रत्रयाय वौषट् । प्रचोदयात् परमात्मने अस्त्राय फट् ॥

भूर्भुवस्सुवरोमिति दिग्बन्धः । ध्यानम् ।

मुक्ताविद्रुम-हेमनील-धवलच्छायै र्मुखै-स्त्रीक्षणै-
युक्तामिन्दु-निबद्धरत्नमकुटां तत्वार्थवर्णात्मिकाम् ।
गायत्रीं वरदाभयांकुशकशाः शुभ्रं कपालं गुणं
शंखं चक्रमथारविन्द-युगलं हस्तैर्वहन्तीं भजे ॥

अक्षस्रक्कुण्डिकाहस्तां शुद्धस्फटिकनिर्मलाम् ।
सर्वविद्यामयीं वन्दे गायत्रीं वेदमातरम् ॥

यो देवः सवितास्माकं धियो धर्माधिगोचराः ।
प्रेरयेत्तस्य यद्भर्गस्तद्वरेण्य-मुपास्महे ॥

पंचपूजा । लं पृथिव्यात्मने गन्धं समर्पयामि । हं आकाशात्मने पुष्पैः पूजयामि । यं वाय्वात्मने धूपमाघ्रापयामि । रं अग्न्यात्मने दीपं दर्शयामि । वं अमृतात्मने अमृतं महानैवेद्यं निवेदयामि । सं सर्वात्मने सर्वोपचारपूजां समर्पयामि ॥)

ओं । भूर्भुवस्सुवः । तत्सवितुर्वरेण्यं । भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥

ओं भूः+भूर्भुवस्सुवरोम् ॥

(अंगन्यासः । ध्यानम् । पंचपूजा ॥) १३ ॥

प्रातः सन्ध्योपस्थानं करिष्ये ॥ उत्तमे शिखरे देवी भूम्यां पर्वतमूर्धनि । ब्राह्मणेभ्यो ह्यनुज्ञानं गच्छ देवि यथासुखम् ॥

मित्रस्य चर्षणी धृतः श्रवो देवस्य सानसिम् । सत्यं चित्र श्रवस्तमम् । मित्रो जनान् यातयति प्रजानन् मित्रो दाधार पृथिवीमुत द्याम् । मित्रः कृष्टी-रनिमिषाभिचष्टे सत्याय हव्यं घृतवद्विधेम । प्रसमित्र मर्तो अस्तु प्रयस्वान् यस्त आदित्य शिक्षति व्रतेन । न हन्यते न जीयते त्वोतो नैन मंहो अश्नोत्यन्तितो न दूरात् ॥ १४ ॥

आदित्योपस्थानं करिष्ये । उत्तमे शिखरे देवि+यथासुखम् ॥ आसत्येन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च । हिरण्ययेन सविता रथेनादेवो याति भुवना विपश्यन् । उद्वयं तमसस्परि पश्यन्तो ज्योतिरुत्तरम् । देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् । उदुत्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् । चित्रं देवानामुदगा-दनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः । आप्रा द्यावापृथिवी अन्तरिक्षः सूर्य आत्मा जगतस्तस्थुषश्च । तच्चक्षुर्देवहितं पुरस्ताच्छु-क्रमुच्चरत् । पश्येम शरदश्शतं जीवेम शरदश्शतं नन्दाम शरदश्शतं

मोदाम शरदश्शतं भवाम शरदश्शतꣳ शृणवाम शरदश्शतं प्रब्रवाम शरदश्शत-मजीतास्याम शरदश्शतं ज्योक्च सूर्यं दृशे । य उदगान्महतोर्णवाद्विभ्राजमानस्सरिरस्य मध्यात्समा वृषभो लोहिताक्षस्सूर्यो विपश्चिन्मनसा पुनातु ॥ १५ ॥

सायं सन्ध्योपस्थानं करिष्ये । उत्तमे शिखरे देवि+यथा सुखम् ॥ इमं मे वरुण श्रुधीहव-मद्या च मृडय । त्वामवस्युराचके । तत्त्वायामि ब्रह्मणावन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो वरुणेहबोध्युरुशꣳस समान आयुः प्रमोषीः । यच्चिद्धि ते विशो यथा प्रदेव वरुण व्रतम् । मिनीमसि द्यवि द्यवि । यत्किञ्चेदं वरुण दैव्ये जनेऽभिद्रोहं मनुष्याश्चरामसि । अचित्तीयत्तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः । कितवासो यद्रिरिपुर्नदीवि यद्वाघा सत्य-मुतयन्न विद्म । सर्वा ता विष्य शिथिरेव देवाथा ते स्याम वरुण-प्रियासः ॥ १६ ॥

सन्ध्यायै नमः । सावित्र्यै नमः । गायत्र्यै नमः । सरस्वत्यै नमः । सर्वाभ्यो देवताभ्यो नमो नमः । कामोकार्षीन् मन्युरकार्षीन् नमो नमः । अभिवादये + अस्मि भोः ॥ १७ ॥

प्राच्यै दिशे नमः । दक्षिणायै दिशे नमः । प्रतीच्यै दिशे नमः । उदीच्यै दिशे नमः । ऊर्ध्वाय नमः । अधराय नमः ।

अन्तरिक्षाय नमः । भूम्यै नमः । ब्रह्मणे नमः । विष्णवे नमः । मृत्यवे नमः ॥ यमाय नमः । १८ ॥

यमाय धर्मराजाय मृत्यवे चान्तकाय च । वैवस्वताय कालाय सर्वभूतक्षयाय च ॥ औदुंबराय दध्नाय नीलाय परमेष्ठिने । वृकोदराय चित्राय चित्रगुप्ताय वै नमः ॥ चित्रगुप्ताय वै नमः ओं नम इति ॥१९॥

ऋतꣳ सत्यं परं ब्रह्म पुरुषं कृष्णपिंगलम् । ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमः । विश्वरूपाय वै नम ओं नम इति ॥ २० ॥

नर्मदायै नमः प्रातर्नर्मदायै नमो निशि । नमोऽस्तु नर्मदे तुभ्यं त्राहि मां विषसर्पतः ॥ अपसर्प सर्प भद्रं ते दूरं गच्छ महायशाः । जनमेजयस्य यागान्ते आस्तीकवचनं स्मरन् । जरत्कारो-र्जरत्कार्वां समुत्पन्नो महायशाः । आस्तीकस्सत्यसन्धो मां पन्नगेभ्योऽभिरक्षतु ॥२१॥

नमꣳ सवित्रे जगदेकचक्षुषे जगत्प्रसूति-स्थितिनाशहेतवे । त्रयीमयाय त्रिगुणात्मधारिणे विरिंचिनारायण-शंकरात्मने ॥ ध्येयꣳ सदा सवितृ-मण्डल-मध्यवर्ती नारायणꣳ सरसिजासन-सन्निविष्टः । केयूरवान् मकरकुण्डलवान् किरीटी हारी हिरण्मयवपुर्धृतशंखचक्रः ॥ शंखचक्रगदा-पाणे द्वारकानिलयाच्युत । गोविन्द पुण्डरीकाक्ष रक्ष मां शरणागतम् ॥ आकाशात्पतितं तोयं यथा गच्छति सागरम् । सर्वदेवनमस्कारꣳ श्रीकेशवं प्रतिगच्छति ॥ श्रीकेशवं प्रति गच्छत्यों नम इति ॥ २२ ॥

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृते ऱ्स्वभावात् ।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि ॥ २३ ॥

अद्या नो देव सवितः प्रजावत्सावीः सौभगम् । परा दुष्वप्नियꣳ सुव । विश्वानि देवसवितर्दुरितानि परा सुव । यद्भद्रं तन्म आसुव ॥२४॥

॥ ओं तत् सत् ब्रह्मार्पणमस्तु ॥

---

# ॥ समिदाधानम् ॥

आचमनम् ॥ शुक्लांबरधरं+शान्तये ॥

ओं भूः+भूर्भुवस्सुवरोम् ॥

ममोपात्त+प्रीत्यर्थं प्रातः समिदाधानं करिष्ये ॥ (सायं समिदाधानं करिष्ये) ॥

परित्वाग्ने परिमृजाम्यायुषा च धनेन च । सुप्रजाः प्रजया भूयासꣳ सुवीरो वीरैः सुवर्चा वर्चसा सुपोषꣳ पोषैꣳ सुगृहो गृहैꣳ सुपतिꣳ पत्या सुमेधा मेधया सुब्रह्मा ब्रह्मचारिभिः ॥ समन्तं तूष्णीं परिषिञ्च्य ॥ १ ॥

अग्नये समिधमाहार्षं बृहते जातवेदसे । यथा त्वमग्ने समिधा समिध्यस एवं मामायुषा वर्चसा सन्या मेधया प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहा ॥ २ ॥

एधोस्येधिषीमहि स्वाहा ॥ ३ ॥

समिदसि समेधिषीमहि स्वाहा ॥ ४ ॥

तेजोऽसि तेजो मयि धेहि स्वाहा ॥ ५ ॥

अपो अद्यान्वचारिषꣳ रसेन समसृक्ष्महि । पयस्वाꣳ अग्न आगमं तं मा सꣳसृज वर्चसा स्वाहा ॥ ६ ॥

सं माग्ने वर्चसासृज प्रजया च धनेन च स्वाहा ॥ ७ ॥

विद्युन्मे अस्य देवा इन्द्रो विद्यात्सह ऋषिभिः स्वाहा ॥ ८ ॥

अग्नये बृहते नाकाय स्वाहा ॥ ९ ॥

द्यावापृथिवीभ्याꣳस्वाहा ॥ १० ॥

एषा ते अग्ने समित्तया वर्धस्वचाप्यायस्व च तयाऽहं वर्धमानो भूयास-माप्यायमानश्च स्वाहा ॥ ११ ॥

यो माऽग्ने भागिनꣳ सन्तमथाभागं चिकीऋषति । अभागमग्ने तं कुरु मामग्ने भागिनं कुरु स्वाहा ॥ १२ ॥

समिधमाधायाग्ने सर्वव्रतो भूयासꣳ स्वाहा ॥ १३ ॥

तूष्णीं समन्तं परिषिच्य । स्वाहा ॥ अग्नेरुपस्थानं करिष्ये ॥

यत्ते अग्ने तेजस्तेनाहं तेजस्वी भूयासम् । यत्ते अग्ने वर्चस्तेनाहं वर्चस्वी भूयासम् । यत्ते अग्ने हरस्तेनाहं हरस्वी भूयासम् ॥ मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु । मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु । मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु । अग्नये नमः ॥ मन्त्रहीनं क्रियाहीनं भक्तिहीनं हुताशन । यद्धुतं तु मया देव परिपूर्णं तदस्तु ते ॥ प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै । यानि तेषामशेषाणां श्री कृष्णानुस्मरणं परम् ॥ अभिवादये+अस्मि भोः ॥                    १४ ॥

मानस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः । वीरान्मा नो रुद्रभा मितो वधीर्हविष्मन्तो नमसा विधेम ते ॥ मेधावी भूयासं । तेजस्वी भूयासम् । वर्चस्वी भूयासम् । ब्रह्मवर्चसी भूयासम् । आयुष्मान् भूयासम् । अन्नादो भूयासम् । स्वस्ति भूयासम् ॥

श्रद्धां मेधां यशः प्रज्ञां विद्यां बुद्धिं श्रियं बलम् । आयुष्यं तेज आरोग्यं देहि मे हव्यवाहन ॥ देहि मे हव्यवाहन ओं नम इति ॥ आचमनम् ॥                    १५ ॥

---

## ॥ ब्रह्म-यज्ञः ॥

आचमनम् ॥ शुक्लाम्बरधरं+शान्तये ॥ ओं भूः+भूर्भुवस्सुवरोम् ॥ ममोपात्त+ब्रह्मयज्ञं करिष्ये ॥ ब्रह्मयज्ञेन यक्ष्ये ॥ १ ॥

विद्युदसि विद्यमे पाप्मानमृतात् सत्यमुपैमि । (शिरश्चक्षुषी नासिके श्रोत्रे हृदयमालभ्य ।) ॥ २ ॥

ओं भूः, तत्सवितुर्वरेण्यम् । ओं भुवः, भर्गो देवस्य धीमहि । ओं सुवः, धियो यो नः प्रचोदयात् ॥ ओं भूः, तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ॥ ओं भुवः, धियो यो नः प्रचोदयात् ॥ ओं सुवः, तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥ ३ ॥

हरिः ओम् ॥ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ॥ हरिः ओम् ४ ॥

इषेत्वोर्जे त्वा वायवस्थोपायवस्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे ॥ हरिः ओम् ॥ ५ ॥

हरिः ओम् ॥ अग्न आयाहि वीतये गृणानो हव्यदातये । निहोता सत्सि बर्हिषि ॥ हरिः ओम् ॥ ६ ॥

हरिः ओम् ॥ शन्नो देवीरभिष्टय आपो भवन्तु पीतये ।
शंयोरभिस्रवन्तु नः ॥ हरिः ओम् ॥ ७ ॥

ओं भूर्भुवस्सुवः । सत्यं तपः श्रद्धायां जुहोमि ॥ ओं नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः ॥ नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते करोमि ॥ (त्रिः) ॥ वृष्टिरसि वृश्च मे पाप्मानमृतात् सत्यमुपागाम् ॥ ८ ॥

देवर्षि-पितृ-तर्पणं करिष्ये ॥

ब्रह्मादयो ये देवास्तान् देवाꣳस्तर्पयामि । सर्वान् देवाꣳस्तर्पयामि । सर्वदेवगणाꣳस्तर्पयामि । सर्वदेवपत्नीस्तर्पयामि । सर्वगणपत्नीस्तर्पयामि ॥ ९ ॥

(निवीती) ॥ कृष्णद्वैपायनादयो ये ऋषय-स्तान् ऋषीꣳस्तर्पयामि । सर्वान् ऋषीꣳस्तर्पयामि । सर्वऋषिगणाꣳस्तर्पयामि सर्वऋषिपत्नीस्तर्पयामि । सर्वऋषिगणपत्नीस्तर्पयामि ॥

प्रजापतिं काण्डऋषिं तर्पयामि । सोमं काण्डऋषिं तर्पयामि । अग्निं काण्डऋषिं तर्पयामि । विश्वान् देवान् काण्डऋषीꣳस्तर्पयामि ॥

साꣳहितीर्देवता उपनिषदस्तर्पयामि । याज्ञिकीर्देवता उपनिषदस्तर्पयामि । वारुणीर्देवता उपनिषदस्तर्पयामि ॥

हव्यवाहं तर्पयामि । विश्वान् देवान् काण्डऋषीँ स्तर्पयामि । ब्रह्माणं स्वयम्भुवं तर्पयामि । विश्वान् देवान् काण्डऋषीँ स्तर्पयामि । अरुणान् काण्डऋषीँ स्तर्पयामि । सदसस्पतिं तर्पयामि । ऋग्वेदं तर्पयामि । यजुर्वेदं तर्पयामि । सामवेदं तर्पयामि । अथर्ववेदं तर्पयामि । इतिहासपुराणं तर्पयामि । कल्पं तर्पयामि ॥ १० ॥

(प्राचीनावीती) ॥ सोमः पितृमान् यमोऽङ्गिरस्वान् अग्निःकव्यवाहन इत्यादयो ये पितरस्तान् पितॄँ स्तर्पयामि । सर्वान् पितॄँ स्तर्पयामि । सर्वपितृगणाँ स्तर्पयामि । सर्वपितृपत्नीस्तर्पयामि । सर्वपितृगणपत्नीस्तर्पयामि ॥

ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतं स्वधास्थ तर्पयत मे पितॄन् ॥

SRI GNANANANDA NIKETAN LIBRARY, THAPOVANAM P. O. Pin-605756

तृप्यत तृप्यत तृप्यत॥

(उपवीती) आचामेत् ॥ ११ ॥

---

## यज्ञोपवीतधारण-मन्त्रः

आचमनम् । शुक्लांबरधरं+शान्तये । ओं भूः+भूर्भुवस्सुवरोम् ॥

ममोपात्त-समस्त-दुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं श्रौतस्मार्त-विहित-नित्यकर्मानुष्ठानयोग्यता-सिद्ध्यर्थं यज्ञोपवीत-धारणं करिष्ये ॥

यज्ञोपवीत-धारणमहामन्त्रस्य परब्रह्म ऋषिः । त्रिष्टुप् छन्दः । परमात्मा देवता । यज्ञोपवीत-धारणे विनियोगः ॥

यज्ञोपवीतं परमं पवित्रं प्रजापते-र्यत्सहजं पुरस्तात् । आयुष्य-मग्र्यं प्रतिमुंच शुभ्रम् यज्ञोपवीतं बलमस्तु तेजः ॥

उपवीतं भिन्नतन्तुं जीर्णं कश्मल-दूषितम् । विसृजामि पुनर्ब्रह्मन् वर्चो दीर्घायुरस्तु मे ॥

---

# पितृपूजामन्त्राः

आयात पितरस्सोम्या गम्भीरैः पथिभिः पूर्व्यैः । प्रजामस्भ्यं ददतो रयिं च दीर्घायुत्वं च शतशारदं च ॥ १ ॥

सकृदाच्छिन्नं बर्हिरूर्णामृदु । स्योनं पितृभ्यस्त्वाभराम्यहम् । अस्मिन् सीदन्तु पितरः सोम्याः । पितामहाः प्रपितामहाश्चा-नुगैः सह ॥ २ ॥

उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः । असुं य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ॥ ३ ॥

अंगिरसो नः पितरो नवंग्वा अथर्वाणो भृगवस्सोम्यासः ।
तेषाँ वयꣳ सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ॥ ४ ॥

आयन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः ।
अस्मिन् यज्ञे स्वधया मदन्त्वधिब्रुवन्तु ते अवन्त्वस्मान् ॥ ५ ॥

ऊर्जँ वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतꣳ स्वधास्थ तर्पयत मे
पितॄन् ॥ ६ ॥

पितृभ्यः स्वधाविभ्यः स्वधा नमः । पितामहेभ्यः स्वधाविभ्यः
स्वधा नमः ॥ प्रपितामहेभ्यः स्वधाविभ्यः स्वधा नमः ॥ ७ ॥

ये चेह पितरो ये च नेह यांश्च विद्म याꣳ उ च न प्रविद्म ।
अग्ने तान् वेत्थ यदि ते जातवेदस्तया प्रत्तꣳ स्वधया मदन्तु ॥ ८ ॥

मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नस्सन्त्वोषधीः ॥
मधुनक्तमुतोषसि मधुमत्पार्थिवꣳ रजः । मधुद्यौरस्तु नः पिता ॥ मधुमान्नो
वनस्पतिर्मधुमाꣳ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ॥ ९ ॥

देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च । नमः स्वधायै
स्वाहायै नित्यमेव नमो नमः ॥ १० ॥

समस्तसंपत्समवाप्तिहेतवः समुत्थितापत्कुलधूमकेतवः। अपार-संसार-समुद्रसेतवः पुनन्तु मां ब्राह्मणपादपांसवः ॥ ११ ॥

आधि-व्याधिहरं नृणां मृत्युदारिद्र्यनाशनम्। श्रीपुष्टिकीर्तिदं वन्दे विप्रश्रीपादपंकजम् ॥ विप्रौघदर्शनात्सद्यः क्षीयन्ते पापराशयः। वन्दनान्मंगळावाप्ति-रर्चनादच्युतं पदम् ॥ १२ ॥

तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्। तद्विप्रासो विपन्यवो जागृवाꣳसस्समिन्धते। विष्णोर्यत्परमं पदम् ॥ १३ ॥

विश्वे देवाः शृणुतेमꣳ हवं मे ये अन्तरिक्षे य उपद्यविष्ठ। ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन् बर्हिषि मादयध्वम् ॥ १४ ॥

आगच्छन्तु महाभागा विश्वेदेवा महाबलाः। ये अत्र विहिताः श्राद्धे सावधाना भवन्तु ते ॥ १५ ॥

या दिव्या आपः पयसा संबभूवु-र्या अन्तरिक्ष उत पार्थिवीर्याः। हिरण्यवर्णा यज्ञियास्ता न आपः शꣳ स्योना भवन्तु ॥ १६ ॥

यन्मे माता (पितामही, प्रपितामही) प्रलुलोभ चरत्यननुव्रता। तन्मे रेतः पिता (पितामहो, प्रपितामहो) वृंक्तामाभुरन्योऽवपद्यताम् ॥ १७ ॥

यास्तिष्ठन्ति या धावन्ति या आर्द्रोघ्नीः परितस्थुषीः । अद्भिर्विश्वस्य भर्त्रीभिरन्तरन्यं पितुर्दधे ॥ १८ ॥

अन्तर्दधे पर्वतैरन्तर्मह्या पृथिव्या । आभिर्दिग्भिरनन्ताभिरन्तरन्यं पितामहाद्दधे ॥ १९ ॥

अन्तर्दध ऋतुभि - रहोरात्रैश्च सन्धिभिः । अर्धमासैश्च मासैश्चान्तरन्यं प्रपितामहाद्दधे ॥ २० ॥

एष ते तत मधुमाꣳ ऊर्मिस्सरस्वान् यावानग्निश्च पृथिवी च तावत्यस्य मात्रा तावतीं त एतां मात्रां ददामि यथाऽग्निरक्षितोऽनुपदस्त एवं मह्यं पित्रेऽक्षितोऽनुपदस्तस्स्वधा भवतां त्वꣳ स्वधां तैस्सहोपजीवर्चस्ते महिमा ॥ २१ ॥

एषते पितामह मधुमाꣳ ऊर्मिस्सरस्वान् यावान् वायुश्चान्तरिक्षं च तावत्यस्य मात्रा तावतीं त एतां मात्रां ददामि यथा वायुरक्षितोऽनुपदस्त एवं मह्यं पितामहायाक्षितोऽनुपदस्तस्स्वधा भवतां त्वꣳ स्वधां तैस्सहोपजीव सामानि ते महिमा ॥ २२ ॥

एष ते प्रपितामह मधुमाꣳ ऊर्मिस्सरस्वान् यावानादित्यश्च द्यौश्च तावत्यस्य मात्रा तावतीं त एतां मात्रां ददामि यथाऽऽदित्योऽक्षितोऽनुपदस्त एवं मह्यं प्रपितामहायाक्षितोऽनुपदस्तस्स्वधा भवतां त्वꣳ स्वधां तेस्सहोपजीव यजूꣳषि ते महिमा ॥ २३ ॥

अपेत वीत वि च सर्पतातो येऽत्रस्थ पुराणा ये च नूतनाः ।
अदादिदं यमोऽवसानं पृथिव्या अक्रन्निमं पितरो लोकमस्मै ॥ २४ ॥

स ह वै देवानां चासुराणां च यज्ञौ प्रततावास्तां वयꣳ स्वर्गं लोकमेष्यामो वयमेष्याम इति तेऽसुरास्सन्नह्य सहसैवाचरन् ब्रह्मचर्येण तपसैव देवास्तेऽसुरा अमुह्यꣳस्ते न प्राजानꣳस्ते पराभवन् ते न स्वर्गं लोकमायन् प्रसृतेन वै यज्ञेन देवाः स्वर्गं लोकमायन्नप्रसृतेनासुरान् पराभावयन् प्रसृतो ह वै यज्ञोपवीतिनो यज्ञोऽप्रसृतोऽनुपवीतिनो यत्किञ्च ब्राह्मणो यज्ञोपवीत्यधीते यजत एव तत्तस्माद्यज्ञोपवीत्येवाधीयीत याजयेद्यजेत वा यज्ञस्य प्रसृत्या अजिनं वासो वा दक्षिणत उपवीय दक्षिणं बाहुमुद्धरतेऽवधत्ते सव्यमिति यज्ञोपवीतमेतदेव विपरीतं प्राचीनावीतꣳ

संवीतं मानुषम् ॥ रक्षाꣳसि ह वा पुरोऽनुवाके तपोग्रमतिष्ठन्त तान् प्रजापतिर्वरेणोपामन्त्रयत तानि वरमवृणीतादित्यो नो योद्धा इति तान् प्रजापतिरब्रवीद्योधयध्वमिति तस्मादुत्तिष्ठन्तꣳ ह वा तानि रक्षाꣳस्यादित्यं योधयन्ति यावदस्तमन्वगात्तानि ह वा एतानि रक्षाꣳसि गायत्रियाऽभि-मन्त्रितेनांभसा शाम्यन्ति तदु ह वा एते ब्रह्मवादिनः पूर्वाभिमुखाः सन्ध्यायां गायत्रियाऽभिमन्त्रिता आप ऊर्ध्वं विक्षिपन्ति ता एता आपो वज्री भूत्वा तानि रक्षाꣳसि मन्देहारुणे द्वीपे प्रक्षिपन्ति यत्प्रदक्षिणं प्रक्रमन्ति तेन पाप्मानमवधून्वन्त्युद्यन्त-मस्तं यन्त-मादित्यमभिध्यायन् कुर्वन् ब्राह्मणो विद्वान् सकलं भद्रमश्नुतेऽसावादित्यो ब्रह्मेति ब्रह्मैव सन् ब्रह्माप्येति य एवं वेद ॥ ओं तत्सत् ॥ २५ ॥

पृथिवी ते पात्रं द्यौरपिधानं ब्रह्मणस्त्वा मुखे जुहोमि ब्राह्मणानां त्वा प्राणापानयो-र्जुहोम्यक्षितमसि मैषां क्षेष्ठा अमुत्रामुष्मिन् लोके २६॥

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढ-मस्यपाꣳ सुरे ॥

इदमिदं हव्यं अमृतस्वरूप-मातृप्ते-र्दत्तं दास्यमान-मन्नं च ब्रह्माहं च ब्रह्म भोक्ता च ब्रह्म गयेयं भूमि-र्गदाधरो भोक्ता स्वर्णमयं पात्र-मक्षयवटच्छायायां गयायां विष्णु-पादादि-समस्तपादेषु दत्तम् ॥

एको विष्णु-र्महद्भूतं पृथग्भूतान्यनेकशः । त्रीन् लोकान्व्याप्य भूतात्मा भुंक्ते विश्वभुगव्ययः ॥ २९ ॥

ईशान - विष्णु - कमलासन - कार्तिकेय - वह्नित्र्यार्क - रजनीश-गणेश्वराणाम् । क्रौंचामरेन्द्र-कलशोद्भव-कश्यपानां पादान्नमामि सततं पितृमुक्तिहेतोः ॥ ३० ॥

श्रद्धायां प्राणे निविष्टोऽमृतं जुहोमि । शिवो मा विशाप्रदाहाय । प्राणाय स्वाहा ॥ श्रद्धायामपाने निविष्टो+अपानाय स्वाहा ॥ श्रद्धायां व्याने+व्यानाय स्वाहा ॥ श्रद्धाया-मुदाने+उदानाय स्वाहा ॥ श्रद्धायाऽ समाने+समानाय स्वाहा ॥ ब्रह्मणे स्वाहा । ब्रह्मणि म आत्माऽ-मृतत्त्वाय ॥ ३१ ॥

अक्षन्नमीमदन्त ह्यवप्रिया अधूषत । अस्तोषत स्वभानवो विप्रा न विष्ठया मती । योजान्विन्द्र ते हरी ॥ ३२ ॥

ये अग्निदग्धा येऽनग्निदग्धा ये वा जाताः कुले मम । भूमौ दत्तेन पिण्डेन तृप्तायान्तु परांगतिम् ॥ ३३ ॥

आमा वाजस्य प्रसवो जगम्या-द्यावापृथिवी विश्वशंभू । आमागन्तां पितरा मातरा चामा सोमो अमृतत्वाय गम्यात् ॥ ३४ ॥

नमो वः पितरो रसाय नमो वः पितरः शुष्माय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो मन्यवे नमो वः पितरो घोराय पितरो नमो वो य एतस्मिन्लोके स्थ युष्माꣳस्तेऽनु येऽस्मिन्लोके मां तेऽनु य एतस्मिन्लोके स्थ यूयं तेषां वसिष्ठा भूयास्त येऽस्मिन्लोकेऽहं तेषां वसिष्ठो भूयासम् ॥ ३५ ॥

दातारो नोऽभिवर्धन्तां वेदसाततिरेव नः । श्रद्धा च नो मा व्यपगाद्बहुदेयं च नो अस्तु ॥ अन्नं च नो बहु भवेदतिथीꣳश्च लभेमहि । याचितारश्च नस्सन्तु मा च याचिष्म कञ्चन ॥ ३६ ॥

स्वादुꣳषꣳसदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो गभीराः । चित्रसेना इषुबला अमृध्रास्सतो वीरा उरवो व्रातसाहाः । ब्राह्मणासः पितरस्सोम्यासः शिवे नो द्यावापृथिवी अनेहसा । पूषा नः पातु दुरितादृतावृधो रक्षा माकिर्नो अघशꣳस ईशत । सुपर्णं वस्ते मृगो अस्या दन्तो गोभिस्सन्नद्धा पतति प्रसूता । यत्रा नरस्सं च वि च द्रवन्ति तत्रास्मभ्यमिषवश्शर्मयꣳसन् । अक्षय्यम् ॥ ३७ ॥

अष्टावष्टावन्येषु धिष्णियेषूपदधात्यष्टाशफाः पशवः पशूनेवावरुन्धे षण्मार्जालीये षड्वा ऋतव ऋतवः खलु वै देवाः पितर ऋतूनेव देवान् पितॄन् प्रीणाति ॥ ३८ ॥

वाजे वाजे ऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः । अस्य मध्वः पिबत मादयध्वं तृप्तायात पथिभिर्देवयानैः ॥ ३९ ॥

पुत्रान् पौत्रानभि तर्पयन्तीरापो मधुमतीरिमाः । स्वधां पितृभ्यो अमृतं दुहाना आपो देवीरुभयाꣳस्तर्पयन्तु ॥ ४० ॥

बृहत्साम क्षत्रभृद्वृद्धवृष्णियं त्रिष्टुभौजः शुभितमुग्रवीरम् । इन्द्रस्तोमेन पञ्चदशेन मध्यमिदं वातेन सगरेण रक्ष ॥ ४१ ॥

---

## ॥ होम मन्त्राः ॥

ऋद्ध्यास्म हव्यैर्नमसोपसद्य । मित्रं देवं मित्रधेयन्नो अस्तु । अनूराधान् हविषा वर्धयन्तः । शतं जीवेम शरदः सवीराः ॥ १ ॥

नमस्सदसे नमस्सदसस्पतये नमस्सखीनां पुरोगाणां चक्षुषे नमो दिवे नमः पृथिव्यै ॥ २ ॥

अदितेऽनुमन्यस्व । अनुमतेऽनुमन्यस्व । सरस्वतेऽनुमन्यस्व । देव सवितः प्रसुव ॥ ३ ॥

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्तहस्तासो अस्य । त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याꣳ आविवेश । एष हि देवः प्रदिशोऽनु सर्वाः पूर्वो हि जातः स उ गर्भे अन्तः । स विजायमानः स जनिष्यमाणः प्रत्यङ्मुखास्तिष्ठति विश्वतोमुखः ॥ ४ ॥

अनाज्ञातं यदाज्ञातम् । यज्ञस्य क्रियते मिथु । अग्ने तदस्य कल्पय । त्वꣳ हि वेत्थ यथातथम् ॥ पुरुष सम्मितो यज्ञः । यज्ञः पुरुषसम्मितः । अग्ने तदस्य कल्पय । त्वꣳ हि वेत्थ यथातथम् ॥ यत्पाकत्रा मनसा दीनदक्षा न । यज्ञस्य मन्वते मर्तासः । अग्निष्टद्धोता क्रतुविद्विजानन् । यजिष्ठो देवाꣳ ऋतुशो यजाति ॥ ५ ॥

पूर्णाहुतिमुत्तमां जुहोति । सर्वं वै पूर्णाहुतिः । सर्वमेवाप्नोति । अथो इयं वै पूर्णाहुतिः । अस्यामेव प्रतितिष्ठति ॥ ६ ॥

सप्त ते अग्ने समिधः सप्त जिह्वाः । सप्त ऋषयः सप्तधामप्रियाणि । सप्तहोत्रास्सप्तधा त्वां यजन्ति सप्तयोनीरापृणस्वा घृतेन स्वाहा ॥ ७ ॥

प्राच्यां दिशि देवो ऋत्विजो मार्जयन्ताम् । दक्षिणस्यां दिशि मासाः पितरो मार्जयन्ताम् । प्रतीच्यां दिशि गृहाः पशवो मार्जयन्ताम् । उदीच्यां दिशि आप ओषधयो वनस्पतयो मार्जयन्ताम् । ऊर्ध्वायां दिशि यज्ञः संवत्सरो यज्ञपतिमार्जयन्ताम् ॥८॥

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम ॥९॥

मन्त्रहीनं क्रियाहीनं भक्तिहीनं हुताशन । यद्धुतं तु मया देव परिपूर्णं तदस्तु ते । प्रायश्चित्तान्यशेषाणि तपः कर्मात्मकानि वै । यानि तेषा - मशेषाणां कृष्णानुस्मरणं परम् ॥ नमस्ते गार्हपत्याय नमस्ते दक्षिणाग्नये । नम आहवनीयाय महावेद्यै नमो नमः । काण्डद्वयोपपाद्याय कर्मब्रह्मस्वरूपिणे । स्वर्गापवर्गरूपाय यज्ञेशाय नमो नमः ॥ यज्ञेशाच्युत गोविन्द माधवानन्त केशव । कृष्ण विष्णो हृषीकेश वासुदेव नमोस्तु ते ॥ १० ॥

## ॥ जयादि मन्त्राः ॥

चित्तं च चित्तिश्चाऽऽकूतंचाऽऽकूतिश्च विज्ञातं च विज्ञानं च मनश्च शक्करीश्च दर्शश्च पूर्णमासश्च बृहच्च रथन्तरं च प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतनाज्येषु तस्मै विशः समनमन्त सर्वाः स उग्रः सहिहव्यो बभूव ॥ १ ॥

अग्निर्भूताना - मधिपतिः समावत्विन्द्रो ज्येष्ठानां यमः पृथिव्या वायुरन्तरिक्षस्य सूर्यो दिवश्चन्द्रमा नक्षत्राणां बृहस्पतिर्ब्रह्मणो मित्रः सत्यानां वरुणोऽपां समुद्रः स्रोत्याना - मन्नꣳ साम्राज्याना - मधिपति तन्मावतु सोम ओषधीनाꣳ सविता प्रसवानां रुद्रः पशूनां त्वष्टा रूपाणां विष्णुः पर्वतानां मरुतो गणाना-मधिपतयस्ते मावन्तु पितरः पितामहाः परेऽवरे ततास्ततामहा इहमावत । अस्मिन् ब्रह्मन्नस्मिन् क्षत्रेऽस्या-माशिष्यस्यां पुरोधाया - मस्मिन् कर्मन्नस्यां देवहूत्याम् ॥ २ ॥

ऋताषाड् ऋतधामाऽऽग्निर्गन्धर्वस्तस्यौषधयोऽप्सरस ऊर्जो नाम स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्म क्षत्रं पान्तु तस्मै स्वाहा ताभ्यः

स्वाहा स१्हितो विश्वसामा सूर्यो गन्धर्वस्तस्य मरीचयोऽप्सरस आयुवः सुषुम्नः सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो बेकुरयो भुज्युः सुपर्णो यज्ञो गन्धर्वस्तस्य दक्षिणा अप्सरसस्तवाः प्रजापतिर्विश्वकर्मा मनो गन्धर्वस्तस्यर्क्सामान्यप्सरसो वह्नय इषिरो विश्वव्यचा वातो गन्धर्वस्तस्याऽऽपोऽप्सरसो मुदा भुवनस्य पते यस्य त उपरिगृहा इह च। स नो रास्वाज्यानिꣳ रायस्पोषꣳ सुवीर्यꣳ संवत्सरीणाꣳ स्वस्तिꣳ स्वाहा परमेष्ठ्यधिपति-र्मृत्युर्गन्धर्वस्तस्य विश्वमप्सरसो भुवः सुक्षितिः सुभूति-र्भद्रकृत् सुवर्वान् पर्जन्यो गन्धर्वस्तस्य विद्युतोऽप्सरसो रुचो दूरे हेति-रमृडयो-मृत्युर्गन्धर्वस्तस्य प्रजा अप्सरसो भीरुवश्चारुः कृपणकाशी कामो गन्धर्वस्तस्याऽऽधयो ऽप्सरसः शोचयन्तीर्नाम स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्म क्षत्रं पान्तु तस्मै स्वाहा ताभ्यः स्वाहा सनो भुवनस्य पते यस्य त उपरि गृहा इह च। उरु ब्रह्मणेऽस्मै क्षत्राय महि शर्म यच्छ ॥ २ ॥

## ॥ देव पूजामन्त्राः ॥

आपोवा इदꣳ सर्वं विश्वा भूतान्यापः प्राणा वा आपः पशव आपो ऽन्नमापो ऽमृतमापस्संराडापो विराडापः स्वराडापश्छन्दाꣳ स्यापो ज्योतीꣳष्यापो यजूꣳ ष्यापः सत्यमापः सर्वा देवता आपो भूर्भुवस्सुवराप ओम् ॥ १ ॥

पवनराजाय विद्महे पाञ्चजन्याय धीमहि । तन्नः शंखः प्रचोदयात् ॥ २ ॥

गणानां त्वा गणपतिꣳ हवामहे कविं कवीना-मुपमश्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम् ॥ ३ ॥

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । ऊर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॥ ४ ॥

गौरी मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी । अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन् ॥ ५ ॥

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं । ईश्वरीꣳ सर्वभूतानां तामिहोपह्वये श्रियम् ॥ ६ ॥

निधनपतये नमः । निधनपतान्तिकाय नमः । ऊर्ध्वाय नमः । ऊर्ध्वलिंगाय नमः । हिरण्याय नमः । हिरण्यलिंगाय नमः । सुवर्णाय नमः । सुवर्णलिंगाय नमः । दिव्याय नमः । दिव्यलिंगाय नमः । भवाय नमः । भवलिंगाय नमः । शर्वाय नमः । शर्वलिंगाय नमः । शिवाय नमः । शिवलिंगाय नमः । ज्वलाय नमः । ज्वललिंगाय नमः । आत्माय नमः । आत्मलिंगाय नमः । परमाय नमः । परमलिंगाय नमः । एतत् सोमस्य सूर्यस्य सर्वलिंगꣳस्थापयति पाणिमन्त्रं पवित्रम् ॥ (अर्चनम्) ॥ ७ ॥

धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान् धूर्वति तं धूर्व यं वयं धूर्वामस्त्वं देवानामसि सस्नितमं पप्रितमं जुष्टतमं वह्नितमं देवहूतमम्-अह्रुतमसि हविर्धानं दृꣳहस्व मा ह्वार्मित्रस्य त्वा चक्षुषा प्रेक्षे मा भेर्मा संविक्था मा त्वा हिꣳसिषम् ॥ (धूपमाघ्रापयामि) ॥ ८ ॥

सप्रथ सभां मे गोपाय । ये च सभ्यास्सभासदः । तानिन्द्रियावतः कुरु । सर्वमायुरुपासताम् । अहेबुध्निय मन्त्रं मे गोपाय । यमृषयस्त्रयीविदा विदुः । ऋचस्सामानि यजूꣳषि । सा हि श्रीरमृता सताम् ॥ (अलंकारदीपं दर्शयामि) ॥ ९ ॥

पंचहूतो ह वै नामैषः । तं वा एतं पंचहूतꣳ सन्तम् । पंचहोतेत्याचक्षते परोक्षेण । परोक्षप्रिया इव हि देवाः ॥ (पंचहारतीदीपं दर्शयामि) ॥ १० ॥

गायत्रो वै पर्णः । गायत्राः पशवः । तस्मात् त्रीणि त्रीणि । पर्णस्य पलाशानि । त्रिपदा गायत्री ॥ (गायत्री-दीपं दर्शयामि) ॥ ११ ॥

उद्दीप्यस्व जातवेदोऽपघ्नन्निर्ऋतिं मम । पशूꣳश्च मह्यमावह जीवनं च दिशो दिश । मानो हिꣳसीज्जातवेदो गामश्वं पुरुषं जगत् । अबिभ्रदग्न आगहि श्रिया मा परिपातय ॥ (एक हारती दीपं दर्शयामि) ॥ १२ ॥

हिरण्यपात्रं मधोः पूर्णं ददाति । मदव्योसानीति । एकदा ब्रह्मण उपहरति । एकदैव यजमान आयुस्तेजो ददाति ॥ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्ण-मेवावशिष्यते ॥ (पूर्णकुंभदीपं दर्शयामि) ॥ १३ ॥

ओं भूर्भुवस्सुवः+धियो यो नः प्रचोदयात् । देव सवितः प्रसुव । सत्यं त्वर्तेन परिषिंचामि । (ऋतं त्वा सत्येन परिषिंचामि)

अमृतोपस्तरणमसि । प्राणाय स्वाहा । अपानाय स्वाहा । व्यानाय स्वाहा । उदानाय स्वाहा । समानाय स्वाहा ॥ ब्रह्मणे स्वाहा । (महा नैवेद्यं निवेदयामि) । अमृतापिधानमसि ॥ १४ ॥

पूगीफलसमायुक्तं नागवल्लीदलै-र्युतम् । कर्पूरचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥ (कर्पूरताम्बूलं समर्पयामि) ॥ १५ ॥

सोमो वा एतस्य राज्यमादत्ते । यो राजा सन् राज्यो वा सोमेन यजते । देव सुवामेतानि हवीꣳषि भवन्ति । एतावन्तो वै देवानाꣳ सवाः । त एवास्मै सवान् प्रयच्छन्ति । त एनं पुनः सुवन्ते राज्याय । देवसू राजा भवति ॥ (कर्पूरनीराजन-दीपं दर्शयामि) ॥ १६ ॥

योऽपां पुष्पं वेद । पुष्पवान् प्रजावान् पशुमान् भवति । चन्द्रमा वा अपां पुष्पम् । पुष्पवान् प्रजावान् पशुमान् भवति ॥

ओं तद्ब्रह्म । ओं तद्वायुः । ओं तदात्मा । ओं तत्सत्यम् । ओं तत्सर्वम् । ओं तत्पुरो-र्नमः । अन्तश्चरति भूतेषु गुहायां विश्वमूर्तिषु । त्वं यज्ञस्त्वं वषट्कार-स्त्वमिन्द्र-स्त्वꣳ रुद्रस्त्वं विष्णुस्त्वं ब्रह्म त्वं प्रजापतिः । त्वं तदाप आपो ज्योती रसो ऽमृतं ब्रह्म भूर्भुव-स्सुवरोम् ॥

न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः। परेण नाकं निहितं गुहायां विभ्राजदेतद्यतयो विशन्ति। वेदान्त विज्ञान-सुनिश्चितार्थाः सन्न्यास-योगाद्यतयः शुद्धसत्त्वाः। ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे॥ दह्रं विपापं परमेश्म-भूतं यत्पुण्डरीकं पुरमध्यसंस्थम्। तत्रापि दह्रं गगनं विशोकस्तस्मिन् यदन्तस्तदुपासितव्यम्। यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः। तस्य प्रकृतिलीनस्य यः परः स महेश्वरः॥ (मन्त्रपुष्पं समर्पयामि॥ १७॥

॥ ओं तत्सत् ब्रह्मार्पणमस्तु॥

# ॥ तत्तिरीय यजुर्ब्राह्मणे काठक - भागः ॥

## प्रथमः प्रश्नः ॥

हरिः ओ (४) म् ॥

संज्ञानं विज्ञानं प्रज्ञानं जानदभिजानत् । संकल्पमानं प्रकल्पमान-मुपकल्पमान-मुपक्लप्तं क्लृप्तम् । श्रेयो वसीय आयत्संभूतं भूतम् । चित्रः केतुः प्रभानाभान् संभान् । ज्योतिष्मागं स्तेजस्वानातपगं स्तपन्नभितपन् । रोचनो रोचमानश्शोभनश्शोभमानः कल्याणः । दर्शा दृष्टा दर्शता विश्वरूपा सुदर्शना । आप्यायमाना-प्यायमानाप्याया सूनृतेरा । आपूर्यमाणा पूर्यमाणा पूरयन्ती पूर्णा पौर्णमासी । दाता प्रदातानन्दो मोदः प्रमोदः ॥ १-१ ॥ आवेशयं - न्निवेशयन् संवेशनस्सगं शान्तश्शान्तः । आभवन् प्रभवन् संभवन् संभूतो भूतः । प्रस्तुतं विष्टुतगं सगंस्तुतं कल्याणं विश्वरूपम् । शुक्रममृतं तेजस्वि तेजस्समिद्धम् । अरुणं भानुमन्मरीचिमदभितप - त्तपस्वत् । सविता प्रसविता दीप्तो दीपयन्दीप्यमानः । ज्वलन् ज्वलिता तपन् वितपन्

सन्तपन्। रोचनो रोचमानश्शुंभूश्शुंभमानो वामः। सुता सुन्वती प्रसुता सूयमाना ऽभिषूयमाणा। पीती प्रपासं पातृप्तिस्तर्पयन्ती ॥१-२॥ कान्ता काम्या कामजाताऽऽयुष्मती कामदुघा। अभिशास्तानुमन्तानन्दो मोदः प्रमोदः। आसादयन्निषादयन् सगुंसादन-स्सगुंसन्न-स्सन्नः। आभूर्विभूः प्रभूश्शंभूर्भुवः। पवित्रं पवयिष्यन् पूतो मेध्यः। यशो यशस्वानायु - रमृतः। जीवो जीविष्यन् स्वर्गो लोकः। सहस्वान् सहीयानोजस्वान् सहमानः। जयन्नभिजयन् सुद्रविणो द्रविणोदाः। आर्द्रपवित्रो हरिकेशो मोदः प्रमोदः। १-३ ॥ अरुणोऽरुणरजाः पुण्डरीको विश्वजिदभिजित्। आर्द्रः पिन्वमानोऽन्नवान् रसवा-निरावान्। सर्वौषधस्संभरो महस्वान्। एजत्काजोवत्काः। क्षुल्ल-काश्शिपिविष्टकाः। सरिस्स्वरास्सुशेरवः। अजिरासोगमिष्णवः। इदानीं तदानी-मेतर्हि क्षिप्रमजिरम्। आशुर्निमेषः फणो द्रवन्नतिद्रवन्। त्वरगुं स्त्वरमाण आशुराशीयाञ्जवः। अग्निष्टोम उक्थ्योऽतिरात्रो-द्विरात्र-स्त्रिरात्र-श्चतूरात्रः। अग्नि-र्ऋतुस्सूर्य ऋतु-श्चन्द्रमा ऋतुः। प्रजापति-स्संवत्सरो महान् कः ॥ १-४ ॥ १ ॥

भूरग्निं च पृथिवीं च मां च । त्रीगुंश्च लोकान् संवत्सरं च । प्रजापतिस्त्वा सादयतु । तया देवतया ऽङ्गिरस्व ध्रुवासीद । भुवो वायुं चान्तरिक्षं च मां च । त्रीगुंश्च लोकान् संवत्सरं च । प्रजापतिस्त्वा सादयतु । तया देवतया ऽङ्गिरस्व ध्रुवासीद । स्वरादित्यं च दिवं च मां च । त्रीगुंश्च लोकान् संवत्सरं च । प्रजापतिस्त्वा सादयतु । तया देवतया ऽङ्गिरस्व ध्रुवासीद । भूर्भुवस्स्वश्चन्द्रमसं च दिशश्च मां च । त्रीगुंश्च लोकान् संवत्सरं च । प्रजापतिस्त्वा सादयतु । तया देवतयाऽङ्गीरस्व ध्रुवासीद ॥ २ ॥

त्वमेव त्वां वेत्थ योऽसि सोऽसि । त्वमेव त्वामचैषीः । चितश्चासि संचितश्चास्यग्ने । एतावागुंश्चासि भूयागुंश्चास्यग्ने । यत्ते अग्ने न्यूनं यदु तेऽतिरिक्तम् । आदित्यास्तदंगिरसश्चिन्वन्तु । विश्वे ते देवाश्चितिमापूरयन्तु । चितश्चासि संचितश्चास्यग्ने । एतावागुंश्चासि भूयागुंश्चास्यग्ने । मा ते अग्ने च येन मा ऽति चयेनायुरावृक्षि । सर्वेषां ज्योतिषां ज्योतिर्यद्दावुदेति । तपसो जातमनिभृष्टमोजः । तत्ते ज्योतिरिष्टके । तेन मे

तप । तेन मे ज्वल । तेन मे दीदिहि । यावद्देवाः । यावदसाति सूर्यः । यावदुतापि ब्रह्म ॥ ३ ॥

संवत्सरोऽसि परिवत्सरोऽसि । इदावत्सरोऽसीदुवत्सरोऽसि । इद्वत्सरोऽसि वत्सरोऽसि । तस्य ते वसन्तश्शिरः । ग्रीष्मो दक्षिणः पक्षः । वर्षाः पुच्छम् । शरदुत्तरः पक्षः । हेमन्तो मध्यम् । पूर्वपक्षाश्चितयः । अपरपक्षाः पुरीषम् ॥ ४·१ ॥ अहोरात्रीणीष्टकाः । ऋषभोऽसि स्वर्गो लोकः । यस्यां दिशि महीयसे । ततो नो मह आवह । वायुर्भूत्वा सर्वा दिश आवाहि । सर्वा दिशोऽनु विवाहि । सर्वा दिशोऽनु संवाहि । चित्या चिति-मापृण । अचित्या चिति-मापृण । चिदसि समुद्रयोनिः ॥ ४·२ ॥ इन्दु-र्दक्षः श्येन ऋतावा । हिरण्यपक्षः शकुनो भुरण्युः । महान् सधस्थे ध्रुव आनिषत्तः । नमस्ते अस्तु मा मा हिंसीः । एति प्रेति वीति समित्युदिति । दिवं मे यच्छ । अन्तरिक्षं मे यच्छ । पृथिवीं मे यच्छ । पृथिवीं मे यच्छ । अन्तरिक्षं मे यच्छ । दिवं मे यच्छ । अह्ना प्रसारय । रात्र्या समच । रात्र्या प्रसारय । अह्ना समच । कामं प्रसारय । कामग्ं समच ॥ ४·३ ॥

भूर्भुवस्स्वः । ओजो बलम् । ब्रह्मक्षत्रम् । यशोमहत् । सत्यं तपो नाम । रूप-ममृतम् । चक्षुः श्रोत्रम् । मन आयुः । विश्वं यशो महः । समं तपो हरो भाः । जातवेदा यदि वा पावकोऽसि । वैश्वानरो यदि वा वैद्युतोऽसि । शं प्रजाभ्यो यजमानाय लोकम् । ऊर्जं पुष्टिं ददद्भ्यावंवृत्स्व ॥ ५ ॥

राज्ञी विराज्ञी । संराज्ञी स्वराज्ञी । अर्चिश्शोचिः । तपो हरो भाः । अग्निरिन्द्रो बृहस्पतिः । विश्वेदेवा भुवनस्य गोपाः । ते मा सर्वे यशसा संसृजन्तु ॥ ६ ॥

असवे स्वाहा वसवेस्वाहा । विभुवे स्वाहा विवस्वते स्वाहा । अभिभुवे स्वाहा ऽधिपतये स्वाहा । दिवांपतये स्वाहा ऽꣳहस्पत्याय स्वाहा । चाक्षुष्मत्याय स्वाहा ज्योतिष्मत्याय स्वाहा । राज्ञे स्वाहा विराज्ञे स्वाहा । संराज्ञे स्वाहा स्वराज्ञे स्वाहा । शूषाय स्वाहा सूर्याय स्वाहा । चन्द्रमसे स्वाहा ज्योतिषे स्वाहा । सꣳसर्पाय स्वाहा कल्याणाय स्वाहा । अर्जुनाय स्वाहा ॥ ७ ॥

विपश्चिते पवमानाय गायत । मही न धाराऽत्यन्धो अर्षति ।

अहिंह जीर्णा-मतिसर्पति त्वचम् । अत्योनक्रीडन्नसरदृवृषाहरिः । उप-यामगृहीतोऽसि मृत्यवे त्वा जुष्टं गृह्णामि । एष ते योनि-र्मृत्यवे त्वा । अपमृत्युमपक्षुधम् । अपेतश्शपथं जहि । अधानो अग्न आवह । रायस्पोषगं सहस्रिणम् ॥ ८·१ ॥

ये ते सहस्र-मयुतं पाशाः । मृत्यो मर्त्याय हन्तवे । तान् यज्ञस्य मायया । सर्वानव यजामहे । भक्षोऽस्यमृतभक्षः । तस्य ते मृत्युपीतस्यामृतवतः । स्वगाकृतस्य मधुमतः । उपहूतस्योपहूतो भक्षयामि । मन्द्राऽभिभूतिः केतुर्यज्ञानां वाक् । असावेहि ॥ ८·२ ॥ अन्धो जागृविः प्राण । असावेहि । बधिर आक्रन्दयितरपान । असावेहि । अहस्तोस्त्वा चक्षुः । असावेहि । अपादाशोमनः । असावेहि । कवेविप्रचित्ते श्रोत्र । असावेहि ॥ ८·३ ॥ सुहस्तस्सुवासाः । शूषो नामास्यमृतो मर्त्येषु । तं त्वाऽहंतथा वेद । असावेहि । अग्निर्मे वाचि श्रितः । वाग्घृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । वायुर्मे प्राणे श्रितः ॥ ८·४ ॥ प्राणो हृदये । हृदयं मयि । अहममृते ।

अमृतं ब्रह्मणि । सूर्यो मे चक्षुषि श्रितः । चक्षुर्हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । चन्द्रमा मे मनसि श्रितः ॥ ८.५ ॥ मनो हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । दिशो मे श्रोत्रे श्रिताः । श्रोत्रꣳ हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । आपो मे रेतसि श्रिताः ॥ ८.६ ॥ रेतो हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । पृथिवी मे शरीरे श्रिता । शरीरꣳ हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । ओषधिवनस्पतयो मे लोमसु श्रिताः ॥ ८.७ ॥ लोमानि हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । इन्द्रो मे बले श्रितः । बलꣳ हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । पर्जन्यो मे मूर्ध्नि श्रितः ॥ ८.८ ॥ मूर्धा हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । ईशानो मे मन्यौ श्रितः । मन्युर्हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । आत्मा म आत्मनि श्रितः ॥ ८.९ ॥ आत्मा हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । पुनर्म आत्मा पुनरायु-रागात् । पुनः प्राणः पुनराकूत-मागात् । वैश्वानरो

रश्मिभिर्वावृधानः । अन्तस्तिष्ठत्वमृतस्य गोपाः ॥ ८·१० ॥ ८ ॥

[सहस्रिणं मिहि श्रोत्रासावेहि प्राणे श्रितो मनसि श्रितो रेतसि श्रिता लोमसु श्रिता मूर्ध्नि श्रित आत्मनि श्रितोऽष्टौ च ॥ अग्निर्वायुस्सूर्यश्चन्द्रमा दिश आपः पृथिव्योषधि-वनस्पतय इन्द्रः पर्जन्य ईशान आत्मा पुनर्मे त्रयोदश ॥]

प्रजापति-र्देवानसृजत । ते पाप्मना सन्दिता अजायन्त । तान्व्यद्यत् । यद्व्यद्यत् । तस्माद्विद्युत् । तमवृश्चत् । यदवृश्चत् । तस्माद्वृष्टिः । तस्माद्यत्रैते देवते अभिप्राप्नुतः । विचहैवास्य तत्र पाप्मानं वृतः ॥ ९· १ ॥ वृश्चतश्च । सैषा मीमागंसा ऽग्निहोत्र एव संपन्ना । अथो आहुः । सर्वेषु यज्ञक्रतुष्विति । होष्यन्नप उपस्पृशेत् । विद्युदसि विद्य मे पाप्मानमिति । अथ हुत्वोपस्पृशेत् । वृष्टिरसि वृश्च मे पाप्मानमिति । यक्ष्यमाणो वेष्ट्वा वा । वि चहैवास्यैते देवते पाप्मानं वृतः ॥ ९·२ ॥ वृश्चतश्च । अत्यगंहो हारुणिः । ब्रह्मचारिणे प्रश्नान् प्रोच्य प्रजिघाय । परेहि । प्लक्षन्दैयां पातिं पृच्छ । वेत्थ सावित्रा (३) न वेत्था (३) इति । तमागत्य

पप्रच्छ । आचार्यो माप्राहैषीत् । वेत्थ सावित्रा (३) न वेत्था (३) इति । सहोवाच वेदेति ॥ ९·३ ॥ स कस्मिन् प्रतिष्ठित इति । परोरंजसीति । कस्तद्यत् परो रंजा इति । एष वावस परो रंजा इति होवाच । य एष तपति । एषोऽर्वाग्रजा इति । एकस्मिन्त्वेष इति। सत्य इति । किं तत्सत्यमिति । तप इति ॥ ९·४ ॥ कस्मिन्नु तप इति । बल इति । किं तद्बलमिति । प्राण इति । मास्मं प्राण-मति पृच्छ इति माऽऽचार्योऽब्रवीदिति होवाच ब्रह्मचारी । सहोवाच प्लक्षोदैयां पातिः । यद्वै ब्रह्मचारिन् प्राण-मत्यप्रक्ष्यः । मूर्धा ते व्यपतिष्यत् । अहमुत आचार्याच्छ्रेयान् भविष्यामि । यो मा सावित्रे समवादिष्टेति ॥ ९·५ ॥ तस्मात्सावित्रे न संवदेत । स यो ह वै सावित्रं विदुषा सावित्रे संवदते । सहास्मिञ्छ्रियं दधाति । अनु ह वा अस्मा असौ तपञ्छ्रियं मन्यते । अन्वस्मै श्रीस्तपो मन्यते । अन्वस्मै तपो बलं मन्यते । अन्वस्मै बलं प्राणं मन्यते । स यदाह । संज्ञानं विज्ञानं दर्शा दृष्टेति । एष एव तत् ॥ ९·६ ॥ अथ यदाह । प्रस्तुतं विष्टुतं सुता सुन्वतीति । एष एव तत् । एष ह्येव तान्यहानि ।

एष रात्र्यः । अथ यदाह । चित्रः केतु-र्दाता प्रदाता सविता प्रसवि-
ताभिशास्तानुमन्तेति । एष एव तत् । एष ह्येव तेऽह्नो मुहूर्ताः ।
एष रात्रेः ॥ ९.७ ॥ अथ यदाह । पवित्रं पवयिष्यन् सहस्वान्
सहीयानरुणो ऽरुणरजा इति । एष एव तत् । एष ह्येव ते ऽर्ध
मासाः । एष मासाः । अथ यदाह । अग्निष्टोम उक्थ्यो ऽग्निर्ऋतुः
प्रजापतिस्संवत्सर इति । एष एव तत् । एष ह्येव ते यज्ञ क्रतवः ।
एष ऋतवः ॥ ९.८ ॥ एष संवत्सरः । अथ यदाह । इदानीं
तदानीमिति । एष एव तत् । एष ह्येव ते मुहूर्तानां मुहूर्ताः ।
जनको ह वैदेहः । अहो रात्रैस्समाजगाम । तग्ं होचुः । यो वा
अस्मान् वेद । विजहत्पाप्मानमेति ॥ ९.९ ॥ सर्व-मायुरेति । अभिस्वर्गं
लोकं जयति । नास्या मुष्मिन् लोकेऽन्नं क्षीयत इति । विजहद्धवै
पाप्मानमेति । सर्वमायुरेति । अभिस्वर्गं लोकं जयति । नास्यामुष्मिन्
लोकेऽन्नं क्षीयते । य एवं वेद । अहीनाहाश्वत्थ्यः । सावित्रं विदांचकार
॥९.१०॥ सह हग्ंसो हिरण्मयो भूत्वा । स्वर्गं लोकमियाय । आदित्यस्य
सायुज्यम् । हग्ंसोहवै हिरण्मयो भूत्वा । स्वर्गं लोकमेति । आदित्यस्य

सायुज्यम् । य एवं वेद । देव भागो हश्रौतर्षः । सावित्रं विदांचकार । तꣳ ह वागदृश्यमानाऽभ्युवाच ॥ ९.११ ॥ सर्वं बत गौतमो वेद । यस्सावित्रं वेदेति । सहोवाच । कैषा वागसीति । अयमहꣳ सावित्रः । देवाना - मुत्तमो लोकः । गुह्यं महो बिभ्रदिति । एतावतिह गौतमः । यज्ञोपवीतं कृत्वाऽधो निपपात । नमो नम इति ॥ ९.१२ ॥ सहोवाच । मा भैषीर्गौतम । जितो वै ते लोक इति । तस्माद्येके च सावित्रं विदुः । सर्वे ते जितलोकाः । स यो ह वै सावित्रस्या- ष्टाक्षरं पदꣳ श्रियाऽभिषिक्तं वेद । श्रियाहैवाभिषिच्यते । घृणिरिति द्वे अक्षरे । सूर्य इति त्रीणि । आदित्य इति त्रीणि ॥ ९.१३ ॥ एतद्वै सावित्रस्याष्टाक्षरं पदꣳ श्रियाऽभिषिक्तम् । य एवं वेद । श्रियाहैवाभिषिच्यते । तदेतदृचाभ्युक्तम् । ऋचो अक्षरे परमे व्योमन् । यस्मिन् देवा अधिविश्वेनिषेदुः । यस्तन्न वेद किमृचा करिष्यति । य इत्तद्विदुस्त इमे समासत इति । न ह वा एतस्यर्चा न यजुषा न साम्नार्थोऽस्ति । यस्सावित्रं वेद ॥ ९.१४ ॥ तदेतत्परि यद्वचक्रम् । आर्द्रं पिन्वमानꣳ स्वर्गं लोक एति । त्रिजह द्विधा भूतानि

संपश्यत् । आर्द्रो ह वै पिन्वमानस्वर्गेलोक एति । विजहन्विश्वाभूतानि संपश्यन् । य एवं वेद । शूषो ह वै वार्ष्णेयः । आदित्येन समाजगाम । तꣳहोवाच । एहि सावित्रं विद्धि । अयं वै स्वर्ग्यो ऽग्निः पारयिष्णु-रमृतात्संभूत इति । एष वाव सावित्रः । य एष तपति । एहि मां विद्धि । इति हैवैनं तदुवाच ॥ ९-१५ ॥

[यतो यतो वेदेति तप इति समवादिष्टेति तद्वाले ऋतवं एति चकारोवाच नम इत्यादित्य इति त्रीणि सावित्रं वेद विद्धि पंच च ॥

संज्ञानं प्रस्तुतं तान्यहानि रात्रयश्चित्रः केतुस्ते ऽहा मुहूर्ता रात्रेः पवित्रं ते ऽर्धमासा अग्निष्टोमो यज्ञक्रतवं इदानीं मुहूर्तानां जनकोऽह्नीनादेवभागः कैषावाक्छूषोहवै ॥]

इयं वाव सरघा । तस्या अग्निरेव सारघं मधु । या एताः पूर्वपक्षापरपक्षयो रात्रयः । ता मधुकृतः । यान्यहानि । ते मधुवृषाः । स यो ह वा एता मधुकृतश्च मधुवृषागंश्च वेद । कुर्वन्ति हास्यै ता अग्नौ मधु । नास्येष्टापूर्तं धयन्ति । अथ यो न वेद ॥ १०·१ ॥ न हास्यैता अग्नौ मधु कुर्वन्ति । धयन्त्यस्येष्टापूर्तम् । यो ह वा

अहोरात्राणां नामधेयानि वेद । नाहोरात्रे-ष्वार्ति-मार्च्छति । संज्ञानं विज्ञानं दर्शा दृष्टेति । एतावनुवाकौ पूर्वपक्षस्याहोरात्राणां नाम धेयानि । प्रस्तुतं विष्टुतग्ं सुता सुन्वतीति । एतावनुवाकावपरपक्ष-स्याहोरात्राणां नामधेयानि । नाहोरात्रेष्वार्ति-मार्च्छति । य एवं वेद ॥ १०·२ ॥ यो ह वै मुहूर्तानान्नामधेयानि वेद । न मुहूर्तेष्वार्ति-मार्च्छति । चित्रः केतु-र्दाता-प्रदाता सविता प्रसविताऽभिशास्ता ऽनुमन्तेति । एतेऽनुवाका मुहूर्तानान्नामधेयानि । न मुहूर्तेष्वार्ति-मार्च्छति । य एवं वेद । योहवा अर्धमासानां च मासानां च नामधेयानि वेद । नार्धमासेषु न मासेष्वार्ति-मार्च्छति । पवित्रं पवयिष्यन् सहस्वान् सहीया-नरुणोऽरुणरजा इति । एतेऽनुवाका अर्ध मासानां च मासानां च नामधेयानि ॥ १०·३ ॥ नार्धमासेषु न मासेष्वार्ति-मार्च्छति । य एवं वेद । यो ह वै यज्ञक्रतूनां चर्तूनां च संवत्सरस्य च नामधेयानि वेद । न यज्ञक्रतुषु नर्तुषु न संवत्सर आर्तिमार्च्छति । अग्निष्टोम उक्थ्योऽग्निर्ऋतुः प्रजापतिस्संवत्सर इति । एतेऽनुवाका यज्ञक्रतूनांचर्तूनां च संवत्सरस्य च नामधेयानि । न

यज्ञक्रतुषु नर्तुषु न संवत्सर आर्तिमार्च्छति । य एवं वेद । यो ह वै मुहूर्तानां मुहूर्तान् वेद । न मुहूर्तानां मुहूर्तेष्वार्ति-मार्च्छति ॥ १०.४॥ इदानीं तदानीमिति । एते वै मुहूर्तानां मुहूर्ताः । न मुहूर्तानां मुहूर्तेष्वार्ति-मार्च्छति । य एवं वेद । अथो यथा क्षेत्रज्ञो भूत्वाऽनुप्रविश्यान्नमत्ति । एवमेवैतान् क्षेत्रज्ञो भूत्वाऽनुप्रविश्यान्नमत्ति । स एतेषामेव सलोकताꣳ सायुज्यमश्नुते । अप पुनर्मृत्युं जयति । य एवं वेद ॥ १०.५॥

[सरघाऽहोरात्राणाꣳ संज्ञानं पूर्वपक्षस्य प्रस्तुत-मपरपक्षस्य मुहूर्तानां चित्रः केतु-रर्धमासानां पवित्रं यज्ञक्रतूना-मग्निष्टोमो मुहूर्तानां मुहूर्तान् वेदेदानीमथो यथा ॥] १० ॥

कश्चिद्ध वा अस्माल्लोकात् प्रेत्य । आत्मानं वेद । अयमहम-स्मीति । कश्चित्स्वंलोकं न प्रतिप्रजानाति । अग्निमुग्धो हैव धूमतान्तः । स्वंलोकं न प्रति प्रजानाति । अथ यो है वैतमग्निꣳ सावित्रं वेद । स एवास्माल्लोकात्प्रेत्य । आत्मानं वेद । अयमहमस्मीति ॥ ११.१ ॥ स स्वंलोकं प्रति प्रजानाति । एष उ वै वैनन्तत्सावित्रः । स्वर्गं लोक

मभिवहति। अहो रात्रैर्वा इदगं सयुग्भिः क्रियते। इति रात्राया दीक्षिषत। इति रात्रायं व्रत-मुपागुरिति। तानि ह्यनेवं विदुषः। अमुष्मिं लोके शेवधिं धयन्ति। धीतगं हैव स शेवधि-मनु-परैति। अथ यो हैवैतमग्निगं सावित्रं वेद॥ ११·२॥ तस्य-हैवाहोरात्राणि। अमुष्मिंल्लोके शेवधिं न धयन्ति। अधीतगं हैव स शेवधिमनुपरैति। भरद्वाजो ह त्रिभिरायुर्भि-र्ब्रह्मचर्य-मुवास। तगं ह जीर्णिगं स्थविरगं शयानम्। इन्द्र उपव्रज्योवाच। भरद्वाज। यत्ते चतुर्थ-वायु-र्दद्याम् किमेनेन कुर्या इति। ब्रह्मचर्यमेवैनेन चरेयमिति होवाच॥ ११·३॥ तगं ह त्रीन्गिरिरूपा न विज्ञातानिव दर्शयां चकार। तेषागं हैकैकस्मान्मुष्टिनाऽऽददे। सहोवाच। भरद्वाजेत्यामन्त्र्य। वेदा वा एते। अनन्ता वै वेदाः। एतद्वा एतै-स्त्रिभि रायुर्भि-रन्ववोचथाः अथ त इतरदननूक्तमेव। एहीयं विद्धि। अयं वै सर्वविद्येति॥ ११·४॥ तस्मै हैतमग्निगं सावित्रमुवाच। तगं स विदित्वा। अमृतो भूत्वा। स्वर्गं लोकमियाय। आदित्यस्य सायु-

ज्यम् । अमृतोहैव भूत्वा । स्वर्गं लोकमेति । आदित्यस्य सायुज्यम् । य एवं वेद । एषो एव त्रयी विद्या ॥ ११·५ ॥ यावन्तगुं ह वै त्रय्या विद्यया लोकं जयति । तावन्तं लोकं जयति । य एवं वेद । अग्नेर्वा एतानि नामधेयानि । अग्नेरेव सायुज्यगुं सलोकतां-माप्नोति । य एवं वेद । वायोर्वा एतानि नामधेयानि । वायोरेव सायुज्यगुं सलोकतां-माप्नोति । य एवं वेद । इन्द्रस्य वा एतानि नामधेयानि ॥ ११·६ ॥ इन्द्रस्यैव सायुज्यगुं सलोकतामाप्नोति । य एवं वेद । बृहस्पतेर्वा एतानि नामधेयानि । बृहस्पतेरेव सायुज्यगुं सलोकतां-माप्नोति । य एवं वेद । प्रजापतेर्वा एतानि नामधेयानि । प्रजापतेरेव सायुज्यगुं सलोकतामाप्नोति । य एवं वेद । ब्रह्मणो वा एतानि नामधेयानि । ब्रह्मण एव सायुज्यगुं सलोकतां-माप्नोति । य एवं वेद । स वा एषोऽग्निरपक्षपुच्छो वायुरेव । तस्याग्निर्मुखम् । असावादित्यश्शिरः । सयदेते देवते अन्तरेण । तत्सर्वगुं सीव्यति । तस्मात्सावित्रः ॥ ११·७ ॥ ११

हरिः ओ(३)म्

इति तैत्तिरीय-यजुर्ब्राह्मणे काठके

प्रथमः प्रश्नः ॥

## ॥ द्वितीयः प्रश्नः ॥

हरिः ओ(४)म् ॥

लोकोऽसि स्वर्गोऽसि। अनन्तोऽस्यपारोऽसि। अक्षितोऽस्यक्षय्योऽसि। तपसः प्रतिष्ठा। त्वयीदमन्तः। विश्वं यक्षं विश्वंभूतं विश्वग्ं सुभूतम्। विश्वस्य भर्ता विश्वस्य जनयिता। तन्त्वोपदधे कामदुघ-मक्षितम्। प्रजापतिस्त्वा सादयतु। तया देवतयाऽङ्गिरस्वद्ध्रुवासीद ॥ १·१ ॥ तपोऽसि लोकेश्रितम्। तेजसः प्रतिष्ठा। त्वयीदमन्तः। विश्वं यक्षं विश्वंभूतं विश्वग्ं सुभूतम्। विश्वस्य भर्तृ विश्वस्य जनयितृ। तत्त्वोपदधे कामदुघमक्षितम्। प्रजापति - स्त्वा सादयतु। तया देवतयाऽङ्गिरस्वद्ध्रुवासीद ॥ १·२ ॥ तेजोसि तपसि श्रितम्। समुद्रस्य प्रतिष्ठा। त्वयीदमन्तः। विश्वं यक्षं विश्वं भूतं विश्वग्ं सुभूतम्। विश्वस्य भर्तृ विश्वस्य जनयितृ। तत्त्वोपदधे कामदुघमक्षितम्। प्रजापतिस्त्वा सादयतु। तया देवतयाऽङ्गिरस्वद्ध्रुवासीद ॥ १·३ ॥ समुद्रोऽसि तेजसि श्रितः। अपां प्रतिष्ठा। त्वयीदमन्तः। विश्वं यक्षं विश्वं भूतं विश्वग्ं सुभूतम्। विश्वस्य भर्ता विश्वस्य जनयिता। तन्त्वोपदधे

कामदुघमक्षितम् । प्रजापतिस्त्वा सादयतु । तया देवतयाऽङ्गिरस्व-ध्रुवासीद ॥ १.४ ॥ आपस्स्थ समुद्रे श्रिताः । पृथिव्याः प्रतिष्ठा युष्मासु । इदमन्तः । विश्वं यक्षं विश्वं भूतं विश्वगुं सुभूतम् । विश्वस्य भर्त्र्यो विश्वस्य जनयित्र्यः । ता व उपदधे कामदुघा अक्षिताः । प्रजापतिस्त्वा सादयतु । तया देवतयाऽङ्गिरस्व ध्रुवासीद ॥ १.५ ॥ पृथिव्यस्यप्सु श्रिता । अग्नेः प्रतिष्ठा । त्वयीदमन्तः । विश्वं यक्षं विश्वंभूतं विश्वगुं सुभूतम् । विश्वस्य भर्त्री विश्वस्य जनयित्री । तां त्वोपदधे कामदुघामक्षिताम् । प्रजापतिस्त्वासादयतु । तया देवतयाऽङ्गिरस्वध्रुवा-सीद ॥ १.६ ॥ अग्निरसि पृथिव्यागुं श्रितः । अन्तरिक्षस्य प्रतिष्ठा । त्वयीदमन्तः । विश्वं यक्षं विश्वं भूतं विश्वगुं सुभूतम् । विश्वस्य भर्ता विश्वस्य जनयिता । तं त्वोपदधे कामदुघमक्षितम् । प्रजापतिस्त्वा सादयतु । तया देवतयाऽङ्गिरस्वध्रुवासीद ॥ १.७ ॥ अन्तरिक्षमस्यग्नौ श्रितम् । वायोः प्रतिष्ठा । त्वयीदमन्तः । विश्वं यक्षं विश्वं भूतं विश्वगुं सुभूतम् । विश्वस्य भर्तृ विश्वस्य जनयितृ । तत्त्वोपधे कामदुघ-मक्षितम् । प्रजापतिस्त्वा सादयतु । तया देवतयाऽङ्गिरस्व-

ध्रुवासीद ॥ १.८ ॥ वायुरस्यन्तरिक्षे श्रितः। दिवः प्रतिष्ठा। त्वयीदमन्तः। विश्वं यक्षं विश्वं भूतं विश्वगुं सुभूतम्। विश्वस्य भर्ता विश्वस्य जनयिता। तंत्वोपदधे कामदुघमक्षितम्। प्रजापतिस्त्वा सादयतु। तया देवतयाऽङ्गिरस्वध्रुवासीद ॥ १.९ ॥ द्यौरसि वायौ श्रिता। आदित्यस्य प्रतिष्ठा। त्वयीदमन्तः। विश्वं यक्षं विश्वं भूतं विश्वगुं सुभूतम्। विश्वस्य भर्त्री विश्वस्य जनयित्री। तांत्वोपदधे कामदुघामक्षिताम्। प्रजापतिस्त्वा सादयतु। तया देवतयाऽङ्गिरस्वध्रुवासीद ॥ १.१० ॥ अदित्योसि दिवि श्रितः। चन्द्रमसः प्रतिष्ठा। त्वयीदमन्तः। विश्वं यक्षं विश्वं भूतं विश्वगुं सुभूतम्। विश्वस्य भर्ता विश्वस्य जनयिता। तंत्वोपदधे कामदुघमक्षितम्। प्रजापतिस्त्वा सादयतु। तया देवतयाऽङ्गिरस्वध्रुवासीद ॥ १.११ ॥ चन्द्रमा अस्यादित्ये श्रितः। नक्षत्राणां प्रतिष्ठा। त्वयीदमन्तः। विश्वं यक्षं विश्वंभूतं विश्वगुं सुभूतम्। विश्वस्य भर्ता विश्वस्य जनयिता। तन्त्वोपधे कामदुघमक्षितम्। प्रजापतिस्त्वा सादयतु। तया देवतयाऽङ्गिरस्वध्रुवासीद ॥१.१२॥ नक्षत्राणिस्थ चन्द्रमसि श्रितानि। संवत्सरस्य प्रतिष्ठा युष्मासु।

इदमन्तः। विश्वं यक्षं विश्वं भूतं विश्वँ सुभूतम्। विश्वस्य भर्तृणि विश्वस्य जनयितॄणि। तानिव उपदधे कामदुघान्यक्षितानि। प्रजापतिस्त्वा सादयतु। तया देवतयाऽङ्गिरस्वध्रुवासीद॥ १.१३॥ संवत्सरोऽसि नक्षत्रेषु श्रितः ऋतूनां प्रतिष्ठा। त्वयीदमन्तः। विश्वं यक्षं विश्वं भूतं विश्वँ सुभूतम्। विश्वस्य भर्ता विश्वस्य जनयिता। तंत्वोपदधे कामदुघमक्षितम्। प्रजापतिस्त्वा सादयतु। तया देवतयाऽङ्गिरस्वध्रुवासीद॥ १.१४॥ ऋतवस्स्थ संवत्सरे श्रिताः। मासानां प्रतिष्ठा युष्मासु। इदमन्तः। विश्वंयक्षं विश्वंभूतं विश्वँ सुभूतम्। विश्वस्य भर्तारो विश्वस्य जनयितारः। तान् व उपदधे कामदुघानक्षितान्। प्रजापतिस्त्वा सादयतु। तया देवतयाऽङ्गिरस्व ध्रुवासीद॥ १.१५॥ मासास्स्थर्तुषु श्रिताः। अर्धमासानां प्रतिष्ठा युष्मासु। इदमन्तः। विश्वं यक्षं विश्वं भूतं विश्वँ सुभूतम्। विश्वस्य भर्तारो विश्वस्य जनयितारः। तान् व उपदधे कामदुघानक्षितान्। प्रजापतिस्त्वा सादयतु। तया देवतया-ऽङ्गिरस्वध्रुवासीद॥ १.१६॥ अर्धमासास्स्थमासु श्रिताः। अहोरात्रयोः प्रतिष्ठा युष्मासु। इदमन्तः। विश्वं यक्षं विश्वंभूतं विश्वँ सुभूतम्।

विश्वस्य भर्तारो विश्वस्य जनयितारः। तान् व उपदधे कामदुघानक्षितान्।
प्रजापतिस्त्वा सादयतु। तया देवतयाऽङ्गिरस्वद्ध्रुवासीद ॥ १·१७ ॥
अहोरात्रेस्थोऽर्धमासेषु श्रिते। भूतस्य प्रतिष्ठे भवस्य प्रतिष्ठे।
युवयोरिदमन्तः। विश्वं यक्षं विश्वंभूतं विश्वगुं सुभूतम्। विश्वस्य
भर्त्र्यौ विश्वस्य जनयित्र्यौ। ते वा-मुपदधे कामदुघेऽक्षिते। प्रजापति-
स्त्वा सादयतु। तया देवतयाऽङ्गिरस्वद्ध्रुवासीद ॥१·१८॥ पौर्णमास्यष्टका
ऽमावास्याँ। अन्नादास्स्थान्नदुघो युष्मासु। इदमन्तः। विश्वं यक्षं विश्वं
भूतम् विश्वगुं सुभूतम्। विश्वस्य भर्त्र्यो विश्वस्य जनयित्र्यः। ताव उपदधे
कामदुघा अक्षिताः। प्रजापतिस्त्वासादयतु। तया देवतयाऽङ्गिरस्वद्ध्रुवा-
सीद ॥ १·१९ ॥ राडसि बृहती श्रीरसीन्द्रपत्नी धर्मपत्नीं। विश्वं भूत-
मनुप्रभूता। त्वयीदमन्तः। विश्वंयक्षं विश्वंभूतं विश्वगुं सुभूतम्। विश्वस्य
भर्त्री विश्वस्य जनयित्री। तां त्वोपदधे कामदुघामक्षिताम्। प्रजा-
पतिस्त्वासादयतु। तया देवतयाऽङ्गिरस्वद्ध्रुवासीद ॥ १·२० ॥
ओजोऽसि सहोऽसि। बलमसि भ्राजोऽसि। देवानां धामामृतम्।
अमर्त्यस्तपोजाः। त्वयीदमन्तः। विश्वंयक्षं विश्वंभूतम् विश्वगुं सुभूतम्।

विश्वस्य भर्ता विश्वस्य जनयिता । तंत्वोपदधे कामदुघमक्षितम् । प्रजापतिस्त्वासादयतु । तया देवतयाऽङ्गिरस्वध्रुवासीद ॥ १·२१ ॥

[लोकस्तपस्तेज-स्समुद्र-आपः पृथिव्यग्निरन्तरिक्षं-वायुर्द्यौ-रादित्यश्चन्द्रमा-नक्षत्राणि संवत्सर ऋतवो मासा अर्धमासा अहोरात्रे पौर्णमासी-राडस्योजो ऽस्येकविंशतिः ॥

लोकोऽसि भर्ता तम् । तपस्तेजोऽसि भर्तृ तत् । समुद्रोऽसि भर्ता तम् । आपस्स्थ भर्त्र्यस्तावः । पृथिवी भर्त्री ताम् । अग्निरसि भर्ता तम् । अन्तरिक्षं भर्तृ तत् । वायुरसि भर्ता तम् । द्यौरसि भर्त्री ताम् । आदित्यश्चन्द्रमा भर्ता तम् । नक्षत्राणिस्थ भर्तॄणि तानि वः । संवत्सरोऽसि भर्ता तम् । ऋतवो मासा अर्धमासा भर्तारो भर्तारो भर्तारस्तान् वः । अहोरात्रे भर्त्र्यौ ते वाम् । पौर्णमासी भर्त्र्यस्तावः । राडसि भर्त्रीताम् । ओजोऽसि भर्ता तमेकविंशतिः ॥] १ ॥

त्वमग्ने रुद्रो असुरो महो दिवः । त्वग्ं शर्धो मारुतं पृक्ष ईशिषे । त्वं वातै-ररुणै-र्यासि शंगयः । त्वं पूषा विधतः पासि

नुत्मनां । देवा देवेषु श्रयध्वम् । प्रथमा द्वितीयेषु श्रयध्वम् । द्वितीयास्तृतीयेषु श्रयध्वम् । तृतीयाश्चतुर्थेषु श्रयध्वम् । चतुर्थाः पंचमेषु श्रयध्वम् । पंचमाष्षष्ठेषु श्रयध्वम् ॥ २·१ ॥ षष्ठाः सप्तमेषु श्रयध्वम् । सप्तमा अष्टमेषु श्रयध्वम् । अष्टमा नवमेषु श्रयध्वम् । नवमा दशमेषु श्रयध्वम् । दशमा एकादशेषु श्रयध्वम् । एकादशा द्वादशेषु श्रयध्वम् । द्वादशास्त्रयोदशेषु श्रयध्वम् । त्रयोदशाश्चतुर्दशेषु श्रयध्वम् । चतुर्दशाः पंचदशेषु श्रयध्वम् । पंचदशाष्षोडशेषु श्रयध्वम् ॥ २·२ ॥ षोडशास्सप्तदशेषु श्रयध्वम् । सप्तदशा अष्टादशेषु श्रयध्वम् । अष्टादशा एकान्नविंशेषु श्रयध्वम् । एकान्नविंशा विंशेषु श्रयध्वम् । विंशा एकविंशेषु श्रयध्वम् । एकविंशा द्वाविंशेषु श्रयध्वम् । द्वाविंशास्त्रयोविंशेषु श्रयध्वम् । त्रयोविंशा - श्चतुर्विंशेषु श्रयध्वम् । चतुर्विंशाः पंचविंशेत्रे श्रयध्वम् पंचविंशाष्षड्विंशेषु श्रयध्वम् ॥ २·३ ॥ षड्विंशास्सप्तविंशेषु श्रयध्वम् । सप्तविंशा अष्टाविंशेषु श्रयध्वम् । अष्टाविंशा एकान्नत्रिंशेषु श्रयध्वम् । एकान्नत्रिंशास्त्रिंशेषु श्रयध्वम् । त्रिंशा एकत्रिंशेषु श्रयध्वम् । एकत्रिंशा द्वात्रिंशेषु

श्रयध्वम् । द्वात्रिंशास्त्रयस्त्रिंशेषु श्रयध्वम् । देवास्त्रिरेकादशास्त्रिस्त्रयस्त्रिंशाः । उत्तरे भवत । उत्तरवर्त्मान उत्तरसत्त्वानः । यत्काम इदं जुहोमि । तन्मे समृध्यताम् । वयग्ं स्याम पतयो रयीणाम् । भूर्भुवस्स्वः स्वाहा ॥ २.४ ॥ २ ॥

अग्नाविष्णूसजोषसा । इमा वर्धन्तु वां गिरः । द्युम्नै - र्वाजेभिरागतम् । राज्ञी विराज्ञी । संराज्ञी स्वराज्ञी । अर्चिश्शोचिः । तपोहरो भाः । अग्निस्सोमो बृहस्पतिः । विश्वेदेवा भुवनस्य गोपाः । ते सर्वे संगत्य । इदं मे प्रावता वचः । वयग्ंस्याम पतयो रयीणाम् । भूर्भुवस्स्वः स्वाहा ॥ ३ ॥

अन्नपते ऽन्नस्य नो देहि । अनमीवस्य शुष्मिणः । प्रप्रदातारन्तारिषः । ऊर्जन्नो धेहि द्विपदे चतुष्पदे । अग्ने पृथिवीपते । सोम वीरुधांपते । त्वष्टस्समिधांपते । विष्णवाशानांपते । मित्र सत्यानां पते । वरुण धर्माणां पते ॥ ४.१ ॥ मरुतो गणानां पतयः । रुद्र पशूनां पते । इन्द्रौजसां पते । बृहस्पते ब्रह्मणस्पते । आरुचारोचेऽहग्ं स्वयम् । रुचा रुरुचे रोचमानः । अतीत्यादस्वराभरेह । तस्मिन् योनौ

प्रजनौ प्रजायेय। वयगं स्याम पतयो रयीणाम्। भूर्भुवस्स्वः स्वाहा ॥ ४.२ ॥ ४ ॥

सप्त ते अग्ने समिधस्सप्तजिह्वाः। सप्त ऋषयः सप्तधाम प्रियाणि। सप्त होत्रा अनुविद्वान्। सप्तयोनीरापृणस्वा घृतेन। प्राची-दिक्। अग्निर्देवता। अग्निगं सदिशांदेवं देवतानामृच्छतु। योमैतस्यै दिशोऽभिदासति। दक्षिणा दिक्। इन्द्रोदेवता ॥ ५.१ ॥ इन्द्रगं सदिशां देवं देवतानामृच्छतु। योमैतस्यै दिशोऽभिदासति। प्रतीची-दिक्। सोमो देवता। सोमगं सदिशां देवं देवतानामृच्छतु। योमैतस्यै दिशोऽभिदासति। उदीची दिक्। मित्रावरुणौ देवता। मित्रावरुणौ स दिशां देवौ देवतानामृच्छतु। यो मैतस्यै दिशोऽभिदासति ॥ ५.२ ॥ ऊर्ध्वा दिक्। बृहस्पति-र्देवता। बृहस्पतिगं सदिशां देवं देवताना-मृच्छतु। योमैतस्यै दिशोऽभिदासति। इयं दिक्। अदितिर्देवता। अदितिगं सदिशां देवीं देवतानामृच्छतु। योमैतस्यै दिशोऽभिदासति। पुरुषो दिक्। पुरुषो मे कामान् समर्धयतु ॥ ५.३ ॥ अन्धो जागृविः प्राण। असावेहि। बधिर आक्रन्दयितरपान। असावेहि। उषसंमुष-

समशीय। अहमसोज्योतिरशीय। अहमसोऽपोऽशीय। वयगं स्याम पतयो रयीणाम्। भूर्भुवस्स्वः स्वाहा ॥ ५.४ ॥

[दक्षिणां दिगिन्द्रो देवता मित्रावरुणौ सदिशां देवौ देवताना-मृच्छतु यो मैतस्यै दिशोऽभिदासत्यर्धयतु नव च ॥] ५ ॥

यत्तेऽचितं यदुचितं ते अग्ने। यच्च ऊनं यदुतेऽतिरिक्तम्। आदित्यास्तदंगिरस-श्चिन्वन्तु। विश्वे ते देवाश्चितिमापूरयन्तु। चितश्चासि संचितश्चास्यग्ने। एतावागंश्चासि भूयागंश्चास्यग्ने। लोक पृणच्छिद्रं पृण। अथोऽसीदशिवात्वम्। इन्द्राग्नी त्वा बृहस्पतिः। अस्मिन् योनावसीषदन् ॥ ६·१ ॥ तया देवतयाऽङ्गिरस्वध्रुवासीद। ता अस्य सूददोहसः। सोमगं श्रीणन्ति पृश्नयः। जन्मन्देवानां विशः। त्रिष्वारोचने दिवः। तया देवतयाऽङ्गिरस्वध्रुवासीद। आग्ने देवागं इहावह। जज्ञानोवृक्त बर्हिषे। असि होता न ईड्यः। अगन्म महामनसायविष्ठम् ॥ ६·२ ॥ योदीदाय समिद्धस्स्वेदुरोणे। चित्रभानू रोदसी अन्तरुर्वी। स्वाहुतं विश्वतः प्रत्यञ्चम्। मेधाकारं विदथस्य प्रसाधनम्। अग्निगं होतारं

परिभूतमं मतिम् । त्वामभस्य हविषं स्समानमित् । त्वां महो वृणते नरो नान्यं त्वत् । मनुष्वत्वानि धीमहि । मनुष्वत्समिधीमहि । अग्ने मनुष्वदंगिरः ॥ ६.३ ॥ देवान् देवायते यंज । अग्निर्हि वाजिनं विशे । ददाति विश्वचर्षणिः । अग्नीराये स्वाभुवम् । स प्रीतो याति वार्यम् । इषगूं स्तोतृभ्य आभर । पृष्टो दिवि पृष्टो अग्निः पृथिव्याम् । पृष्टो विश्वा ओषधीराविवेश । वैश्वानरस्सहसा पृष्टो अग्निः । सनो दिवा सरिषः पातु नक्तम् ॥ ६.४ ॥ ॥ ६ ॥

अयं वा वयः पवते । सोऽग्निर्नाचिकेतः । स यस्माङ् पवते । तदस्य शिरः । अथ यद्दक्षिणा । स दक्षिणः पक्षः । अथ यत्प्रत्यक् । तत्पुच्छम् । यदुदङ् । स उत्तरः पक्षः ॥ ७. १ ॥ अथ यत्संवाति । तदस्य समञ्चनं च प्रसारणं च । अथो संपदेवास्य सा । सगूं ह्वा अस्मै सकामः पद्यते । यत्कामो यजते । योऽग्निं नाचिकेतं चिनुते । य उचैनमेवं वेद । यो ह वा अग्नेर्नाचिकेतस्यायतनं प्रतिष्ठां वेद । आयतनवान् भवति । गच्छति प्रतिष्ठाम् ॥ ७. २ ॥ हिरण्यं वा अग्नेर्नाचिकेतस्यायतनं प्रतिष्ठा । य एवं वेद । आयतनवान् भवति ।

गच्छति प्रतिष्ठाम् । यो ह वा अग्नेर्नाचिकेतस्य शरीरं वेद । स शरीर एव स्वर्गं लोकमेति । हिरण्यं वा अग्नेर्नाचिकेतस्य शरीरम् । य एवं वेद । स शरीर एव स्वर्गं लोकमेति । अथो यथा रुक्म उत्तप्तो भायात् ॥ ७. ३ ॥ एवमेव स तेजसा यशसा । अस्मिंश्च लोकेऽमुष्मिंश्च भाति । उरवो ह वै नामैते लोकाः । येऽवरेणादित्यम् । अथ हैते वरीयांसो लोकाः । ये परेणादित्यम् । अन्तवन्तं ह वा एष क्षय्यं लोकं जयति । योऽवरेणादित्यम् । अथ हैषोऽनन्त-मपार-मक्षय्यं लोकं जयति । यः परेणादित्यम् ॥ ७. ४ ॥ अनन्तं ह वा अपारमक्षय्यं लोकं जयति । योऽग्निं नाचिकेतं चिनुते । य उ चैन-मेवं वेद । अथो यथा रथे तिष्ठन् पक्षसी पर्यावर्तमाने प्रत्यपेक्षते । एवमहोरात्रे प्रत्यपेक्षते । नास्याहोरात्रे लोकमाप्नुतः । योऽग्निं नाचिकेतं चिनुते । य उ चैनमेवं वेद ॥ ७. ५ ॥ ७ ॥

उशन् ह वै वाजश्रवसस्सर्ववेदसं ददौ । तस्य ह नचिकेता नाम पुत्र आस । तं ह कुमारं सन्तम् । दक्षिणासु नीयमानासु श्रद्धाऽऽविवेश । स होवाच । तत कस्मै मां दास्यसीति । द्वितीयं

तृतीयम् । तगं ह परीत उवाच । मृत्यवे त्वा ददामीति । तगं ह स्मोत्थितं वागभिवदति ॥ ८. १ ॥ गौतमकुमारमिति । स होवाच । परेहि मृत्योर्गृहान् । मृत्यवे वै त्वाऽदामिति । तं वै प्रवसन्तं गन्तासीति होवाच । तस्य स्म तिस्रो रात्रीरनाश्वान् गृहे वसतात् । स यदि त्वा पृच्छेत् । कुमार कति रात्री-रवात्सीरिति । तिस्र इति प्रतिब्रूतात् । किं प्रथमागं रात्रि-माश्ना इति ॥ ८. २ ॥ प्रजान्त इति । किं द्वितीयामिति । पशूगं स्त इति । किं तृतीयामिति । साधुकृत्यान्त इति । तं वै प्रवसन्तं जगाम । तस्य ह तिस्रो रात्री रनाश्वान् गृह उवास । तमागत्य पप्रच्छ । कुमार कति रात्री-रवात्सीरिति । तिस्र इति प्रत्युवाच ॥ ८.३ ॥ किं प्रथमागं रात्रि-माश्ना इति । प्रजान्त इति । किं द्वितीयामिति । पशूगंस्त इति । किं तृतीयामिति । साधुकृत्यान्त इति । नमस्ते अस्तु भगव इति होवाच । वरं वृणीष्वेति । पितरमेव जीवन्नयानीति । द्वितीयं वृणीष्वेति ॥ ८.४ ॥ इष्टापूर्तयो-र्मेऽक्षितिं ब्रूहीति होवाच । तस्मै हैत-मग्निं नाचिकेत-मुवाच । ततो वैतस्येष्टापूर्ते नाक्षीयेते । नास्येष्टापूर्ते क्षीयेते । योऽग्निं नाचिकेतं

चिनुते। य उचैनमेवं वेद। तृतीयं वृणीष्वेति। पुनर्मृत्योर्मेऽपजितिं ब्रूहीति होवाच। तस्मै हैतमग्निं नाचिकेत-मुवाच। ततो वै सोऽपपुनर्मृत्यु-मजयत् ॥ ८·५ ॥ अप पुन-र्मृत्युं जयति। योऽग्निं नाचिकेतं चिनुते। य उचैनमेवं वेद। प्रजापतिर्वै प्रजाकाम-स्तपोऽतप्यत। स हिरण्य-मुदास्यत्। तदग्नौ प्रास्यत्। तदस्मै नाच्छदयत्। तद्द्वितीयं प्रास्यत्। तदस्मै नैवाच्छदयत्। तत्तृतीयं प्रास्यत् ॥ ८·६ ॥ तदस्मै नैवाच्छदयत्। तदात्मन्नेव हृदय्येऽग्नौ वैश्वानरे प्रास्यत्। तदस्मा अच्छदयत्। तस्माद्धिरण्यं कनिष्ठं धनानाम्। भुंजत्प्रियतमम्। हृदयजगंहि। सवैतमेव नाविन्दत्। यस्मै तां दक्षिणामनेष्यत्। तागं स्वायैव हस्ताय दक्षिणायानयत्। तां प्रत्यगृह्णात् ॥ ८·७ ॥ दक्षाय त्वा दक्षिणां प्रतिगृह्णामीति। सोऽदक्षत दक्षिणां प्रतिगृह्य। दक्षते ह वै दक्षिणां प्रतिगृह्य। य एवं वेद। एतद्ध स्म वै तद्विद्वांगसो वाजश्रवसा गोतमाः। अप्यनूदेश्यां दक्षिणां प्रतिगृह्णन्ति। उभये न वयं दक्षिष्यामह एव दक्षिणां प्रतिगृह्येति। तेऽदक्षन्त दक्षिणां

प्रतिगृह्य । दक्षते ह्वै दक्षिणां प्रतिगृह्य । य एवं वेद । प्रहान्यं
व्लीनाति ॥ ८·८ ॥ ८ ॥

तगूं हैतमेके पशुबन्ध एवोत्तरवेद्यां चिन्वते । उत्तरवेदि
संमित एषोऽग्निरिति वदन्तः । तन्न तथा कुर्यात् । एतमग्निं कामेन
व्यर्धयेत् । स एनं कामेन व्यृद्धः । कामेन व्यर्धयेत् । सौम्ये
वा वैनमध्वरे चिन्वीत । यत्र वा भूयिष्ठा आहुतयो हूयेरन् ।
एतमग्निं कामेन समर्धयति । स एनं कामेन समृद्धः ॥ ९·१ ॥
कामेन समर्द्धयति । अथ हैनं पुरऋषयः । उत्तरवेद्यामेव सत्रिय-
मचिन्वत । ततो वै ते ऽविन्दन्त प्रजाम् । अभि स्वर्गं लोकं
मजयन् । विन्दते एव प्रजाम् । अभि स्वर्गं लोकं जयति ।
योऽग्निं नाचिकेतं चिनुते । य उ चैनमेवं वेद । अथ हैनं
वायुर्ऋद्धिकामः ॥ ९·२ ॥ यथा न्युप्तमेवोपदधे । ततो वै स
एतामृद्धिमार्ध्नोत् । यामिदं वायुर्ऋद्धः । एतामृद्धिमृध्नोति । यामिदं
वायुर्ऋद्धः । योऽग्निं नाचिकेतं चिनुते । य उ चैनमेवं वेद । अथ
हैनं गोबलो वार्ष्णः पशुकामः । पांक्तमेव चिक्ये । पंच पुरस्तात् ॥ ९·३ ॥

पंच दक्षिणतः । पंच पश्चात् । पंचोत्तरतः । एकां मध्ये । ततो वै सहस्रं पशून् प्राप्नोत् । प्रसहस्रं पशूनाप्नोति । योऽग्निं नाचिकेतं चिनुते । य उचैनमेवं वेद । अथ हैनं प्रजापति-र्ज्यैष्ठ्यकामो यशस्कामः प्रजननकामः । त्रिवृतमेवं चिक्ये ॥ ९·४ ॥ सप्त पुरस्तात् । तिस्रो दक्षिणतः । सप्त पश्चात् । तिस्र उत्तरतः । एकां मध्ये । ततो वै सप्रयशो ज्यैष्ठ्यमाप्नोत् । एतां प्रजातिं प्राजायत । यामिदं प्रजाः प्रजायन्ते । त्रिवृद्वै ज्यैष्ठ्यम् । माता-पिता-पुत्रः ॥ ९·५ ॥ त्रिवृत्प्रजननम् । उपस्थो योनिर्मध्यमा । प्रयशो ज्यैष्ठ्य-माप्नोति । एतां जातिं प्रजायते । यामिदं प्रजाः प्रजायन्ते । योऽग्निं नाचिकेतं चिनुते । य उ चैनमेवं वेद । अथ हैनमिन्द्रो ज्यैष्ठ्यकामः । ऊर्ध्वा एवोपदधे । ततो वै स ज्यैष्ठ्य-मगच्छत् ॥ ९·६ ॥ ज्यैष्ठ्यं गच्छति । योऽग्निं नाचिकेतं चिनुते । य उ चैनमेवं वेद । अथ हैन मरावां-दित्यस्स्वर्गकामः । प्राचीरेवोपदधे । ततो वै सोऽभिस्वर्गं लोकमजयत् । अभिस्वर्गं लोकं जयति । योऽग्निं नाचिकेतं चिनुते । य उ चैनमेवं वेद । स यदीच्छेत् ॥ ९·७ ॥ तेजस्वी यशस्वी ब्रह्मवर्चसी स्यामिति ।

प्राङ्ग होतु-र्धिष्ण्यादुत्सर्पेत । ये यं प्रागायशंस्वती । सा मा प्रोर्णोतु । तेजसा यशसा ब्रह्मवर्चसेनेति । तेजस्व्येव यशस्वी ब्रह्मवर्चसी भवति । अथ यदीच्छेत् । भूयिष्ठं मे श्रद्दधीरन् । भूयिष्ठा दक्षिणा नयेयुरिति । दक्षिणासु नीयमानासु प्राच्येहि प्राच्येहीति प्राची जुषाणा वेत्वाज्यस्य स्वाहेति स्रुवेणोपहत्या हवनीये जुहुयात् ॥ ९·८ ॥ भूयिष्ठ-मेवास्मै श्रद्दधते । भूयिष्ठा दक्षिणा नयन्ति । पुरीष-मुपधाय । चिति क्लृप्तिभिरभिमृश्य । अग्निं प्रणीयोपसमाधाय । चतस्र एता आहुती-र्जुहोति । त्वमग्ने रुद्र इति शतरुद्रीयस्य रूपम् । अग्नाविष्णू इति वसोर्धारायाः । अन्नपत इत्यन्नहोमः । सप्त ते अग्ने समिधस्सप्तजिह्वा इति विश्वप्रीः ॥९·९॥ ९॥

यां प्रथमा-मिष्टका-मुपदधाति । इमं तया लोकमभिजयति । अथो या अस्मिन् लोके देवताः । तासागं सायुज्यगं सलोकतामाप्नोति । यां द्वितीया-मुपदधाति । अन्तरिक्षलोकं तयाऽभिजयति । अथो या अन्तरिक्ष लोके देवताः । तासागं सायुज्यगं सलोकतामाप्नोति । यां तृतीयामुपदधाति । अमुं तया लोकमभिजयति ॥ १०·१ ॥ अथो या अमुष्मिन् लोके देवताः । तासागं सायुज्यगं स लोककतामाप्नोति । अथो या अमूरितरा अष्टादश । य एवामी उरवश्च वरीयागंसश्च लोकाः ।

तानेव ताभिरभिजयति । कामचारो हवा अस्योरुषु च वरीयस्सु च लोकेषु भवति । योऽग्निं नाचिकेतं चिनुते । य उ चैनमेवं वेद । संवत्सरो वा अग्निर्नाचिकेतः । तस्य वसन्तः शिरः ॥ १०.२ ॥ ग्रीष्मो दक्षिणः पक्षः । वर्षा उत्तरः । शरत् पुच्छम् । मासाः कर्मकाराः । अहोरात्रे शतरुद्रीयम् । पर्जन्यो वसोर्धारा । यथा वै पर्जन्यः सुवृष्टं वृष्ट्वा । प्रजाभ्यः सर्वान् कामान् संपूरयति । एवमेव स तस्य सर्वान् कामान् संपूरयति । योऽग्निं नाचिकेतं चिनुते ॥ १०. ३ ॥ य उ चैनमेवं वेद । संवत्सरो वा अग्नि-र्नाचिकेतः । तस्य वसन्तः शिरः । ग्रीष्मो दक्षिणः पक्षः । वर्षाः पुच्छम् । शरदुत्तरः पक्षः । हेमन्तो मध्यम् । पूर्वपक्षाश्चितयः । अपर पक्षाः पुरीषम् । अहोरात्राणीष्टकाः । एष वा वसोऽग्निरग्निमयः पुनर्णवः । अग्निमयो ह्वै पुनर्णवो भूत्वा । स्वर्गं लोकमेति । आदित्यस्य सायुज्यम् । योऽग्निं नाचिकेतं चिनुते । य उ चैनमेवं वेद ॥ १०. ४ ॥ १० ॥

हरिः ओ(३)म्

इति तैत्तिरीय-यजुर्ब्राह्मणे काठके

द्वितीयः प्रश्नः ॥

# तृतीयः प्रश्नः ॥

हरिः ओ (४)म् ॥

तुभ्यं ता अंगिरस्तमाश्यामतं काम-मग्ने । आशानां त्वा विश्वा आशाः । अनुनोऽद्या नु मतिरन्विदनुमते त्वम् । कामो भूतस्य कामस्तदग्रे। ब्रह्मजज्ञानं पिता विराजाम् । यज्ञो रायोऽयं यज्ञः । आपो भद्रा आदित्पश्याभि । तुभ्यं भरन्ति यो देहचः । पूर्वं देवा अपरेण प्राणापानौ । हव्यवाहङ् स्विष्टम् ॥ १ ॥

देवेभ्यो वै स्वर्गो लोकस्तिरोऽभवत् । ते प्रजापति-मब्रुवन् । प्रजापते स्वर्गो वै नो लोकस्तिरोऽभूत् । तमन्विच्छेति । तं यज्ञ क्रतुभि-रन्वैच्छत् । तं यज्ञक्रतुभि-र्नान्वविन्दत् । तमिष्टिभि-रन्वैच्छत् । तमिष्टिभिरन्वविन्दत् । तदिष्टीना-मिष्टित्वम् । एष्टयो ह वै नाम । ता इष्टय इत्याचक्षते परोक्षेण । परोक्षप्रिया इव हि देवाः ॥ २·१ ॥ तमाशीऽब्रवीत् । प्रजापत आशया वै श्राम्यसि । अहमुवा आशास्मि । मान्नुयजस्व । अथ ते सत्याऽऽशा भविष्यति । अनुस्वर्गं लोकं वेत्स्यसीति । स एत-मग्नये कामाय पुरोडाश-मष्टाकपालन्निरवपत् ।

आशायै चरुम् । अनुमत्यै चरुम् । ततो वैतस्य सत्याऽऽशाऽभवत् । अनुस्वर्गं लोकमविन्दत् । सत्याह वा अस्याऽऽशा भवति । अनुस्वर्गं लोकं विन्दति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । अग्नये कामाय स्वाहाऽऽशायै स्वाहा । अनुमत्यै स्वाहा प्रजापतये स्वाहा । स्वर्गाय लोकाय स्वाहाऽग्नये स्विष्टकृते स्वाहेति ॥ २·२ ॥ तं कामोऽब्रवीत् । प्रजापते कामेन वै श्राम्यसि । अहमु वै कामोऽस्मि । मां नु यजस्व । अथ ते सत्यः कामो भविष्यति । अनु स्वर्गं लोकं वेत्स्यसीति । स एतमग्नये कामाय पुरोडाश-मष्टाकपालं निरवपत् । कामाय चरुम् । अनुमत्यै चरुम् । ततो वै तस्य सत्यः कामोऽभवत् । अनुस्वर्गं लोकमविन्दत् । सत्यो ह वा अस्य कामो भवति । अनुस्वर्गं लोकं विन्दति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । अग्नये कामाय स्वाहाकामाय स्वाहा । अनुमत्यै स्वाहा प्रजापतये स्वाहा । स्वर्गाय लोकाय स्वाहाऽग्नयेस्विष्टकृते स्वाहेति ॥ २·३ ॥ तं ब्रह्माब्रवीत् । प्रजापते ब्रह्मणा वै श्राम्यसि । अहमुवै ब्रह्मास्मि । मां नु यजस्व । अथ ते ब्रह्मण्वान् यज्ञो भविष्यति ।

अनु स्वर्गं लोकं वेत्स्यसीति । स एतमग्नये कामाय पुरोडाश-मष्टाकपालं निरवपत् । ब्रह्मणे चरुम् । अनुमत्यै चरुम् । ततो वै तस्य ब्रह्मण्वान् यज्ञोऽभवत् । अनुस्वर्गंलोकमविन्दत् । ब्रह्मण्वान् ह वा अस्य यज्ञो भवति । अनुस्वर्गं लोकं विन्दति । य एतेन हविषा यजते । य उचैनदेवं वेद । सोऽत्र जुहोति । अग्नये कामाय स्वाहा ब्रह्मणे स्वाहा । अनुमत्यै स्वाहा प्रजापतये स्वाहा । स्वर्गाय लोकाय स्वाहा ऽग्नये स्विष्टकृते स्वाहेति ॥ २·४ ॥ तं यज्ञोऽब्रवीत् । प्रजापते यज्ञेन वैश्वाग्न्यसि । अहमु वै यज्ञोऽस्मि । मां नु यजस्व । अथ ते सत्यो यज्ञो भविष्यति । अनु स्वर्गं लोकं वेत्स्यसीति । स एतमग्नये कामाय पुरोडाश-मष्टाकपालं निरवपत् । यज्ञाय चरुम् । अनुमत्यै चरुम् । ततो वै तस्य सत्यो यज्ञोऽभवत् । अनु स्वर्गं लोकमविन्दत् । सत्यो ह वा अस्य यज्ञो भवति । अनुस्वर्गं लोकं विन्दति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । अग्नये कामाय स्वाहा यज्ञाय स्वाहा । अनुमत्यै स्वाहा प्रजापतये स्वाहा । स्वर्गाय लोकाय स्वाहा ऽग्नये स्विष्टकृते स्वाहेति ॥ २·५ ॥ तमापो अब्रुवन् । प्रजापतेऽप्सु वै सर्वे कामाः श्रिताः । वयमु वा आपः स्मः । अस्मान्नु

यजस्व । अथ त्वयि सर्वे कामाः॒ श्रयिष्यन्ते । अनु स्वर्गं लोकं वेत्स्यसीति । स एतमग्नये कामाय पुरोडाश-मष्टाकपालं निरवपत् । अद्भ्यश्चरुम् । अनुमत्यै चरुम् । ततो वै तस्मिन् सर्वे कामा अश्रयन्त । अनु स्वर्गं लोकमविन्दत् । सर्वे ह वा अस्मिन् कामाः॒ श्रयन्ते । अनु स्वर्गं लोकं विन्दति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । अग्नये कामाय स्वाहाऽद्भ्यः स्वाहा । अनुमत्यै स्वाहा प्रजापतये स्वाहा । स्वर्गाय लोकाय स्वाहाऽग्नयेस्विष्टकृते स्वाहेति ॥ २·६ ॥ तमग्निर्बलिमानब्रवीत् । प्रजापतेऽग्नये वै बलिमते सर्वाणि भूतानि बलिः॑ हरन्ति । अहमु वा अग्निर्बलिमानस्मि । मां नु यजस्व । अथ ते सर्वाणि भूतानि बलिः॑ हरिष्यन्ति । अनु स्वर्गं लोकं वेत्स्यसीति । स एतमग्नये कामाय पुरोडाश-मष्टाकपालं निरवपत् । अग्नये बलिमते चरुम् । अनुमत्यै चरुम् । ततो वै तस्मै सर्वाणि भूतानि बलिमहरन् । अनु स्वर्गं लोकमविन्दत् । सर्वाणि ह वा अस्मै भूतानि बलिः॑ हरन्ति । अनु स्वर्गं लोकं विन्दति । य एतेन हविषा यजते । य उ चैनदेवं वेद ।

सोऽत्र जुहोति । अग्नये कामाय स्वाहा ऽग्नये बलिमते स्वाहा ।
अनुमत्यै स्वाहा प्रजापतये स्वाहा । स्वर्गाय लोकाय स्वाहा ऽग्नये
स्विष्टकृते स्वाहेति ॥ २.७ ॥ तमनुवित्तिरब्रवीत् । प्रजापते स्वर्गं
वै लोक-मनुविवित्ससि । अहमुवा अनुवित्तिरस्मि । मां नु यजस्व ।
अथ ते सत्याऽनुवित्तिर्भविष्यति । अनु स्वर्गं लोकं वेत्स्यसीति ।
स एतमग्नये कामाय पुरोडाशमष्टाकपालं निरवपत् । अनुवित्त्यै चरुम् ।
अनुमत्यै चरुम् । ततो वै तस्य सत्यानुवित्तिरभवत् । अनु स्वर्गं
लोकमविन्दत् । सत्या हवा अस्यानुवित्तिर्भवति । अनु स्वर्गं लोकं
विन्दति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र
जुहोति । अग्नये कामाय स्वाहा ऽनुवित्त्यै स्वाहा । अनुमत्यै स्वाहा
प्रजापतये स्वाहा । स्वर्गाय लोकाय स्वाहाऽग्नये स्विष्टकृते
स्वाहेति ॥ २.८ ॥ ता वा एताः सप्तस्वर्गस्य लोकस्य
द्वारः । दिवश्श्येनयोऽनुवित्तयो नाम । आशा प्रथमां रक्षति ।
कामो द्वितीयाम् । ब्रह्म तृतीयाम् । यज्ञश्चतुर्थीम् । आपः पंचमीम् ।
अग्नि-र्बलिमान् षष्ठीम् । अनुवित्तिस्सप्तमीम् । अनु हवै स्वर्गं

लोकं विन्दति। कामचारोऽस्य स्वर्गे लोके भवति। य एता-
भिरिष्टिभिर्यजते। य उ चैना एवं वेद। तास्वन्विष्टि। पष्ठौ ही वरां
दद्यात्कꣳसंचं। स्त्रियै चाभारꣳ समृद्ध्यै ॥ २.९ ॥ २ ॥

तपसा देवा देवता-मग्र आयन्। तपस ऋषयः स्वरन्वविन्दन्।
तपसा सपत्नान् प्रणुदामारातीः। येनेदं विश्वं परिभूतं यदस्ति।
प्रथमजं देवꣳ हविषा विधेम। स्वयम्भु ब्रह्म परमं तपो यत्। स एव
पुत्रस्स पिता स माता। तपो ह यक्षं प्रथमꣳ संबभूव। श्रद्धया
देवो देवत्व-मश्नुते। श्रद्धा प्रतिष्ठा लोकस्य देवी ॥ २.१ ॥ सा
नो जुषाणोप यज्ञमागात्। कामं वत्साऽमृतं दुहाना। श्रद्धा देवी
प्रथमजा ऋतस्य। विश्वस्य भर्त्री जगतः प्रतिष्ठा। ताꣳ श्रद्धाꣳ
हविषा यजामहे। सा नो लोकममृतं दधातु। ईशाना देवी भुवनस्याधि
पत्नी। आगात्सत्यꣳ हविरिदं जुषाणम्। यस्माद्देवा जज्ञिरे भुवनं
च विश्वे। तस्मै विधेम हविषा घृतेन ॥ २.२ ॥ यथा देवैः
सधमादं मदेम। यस्यं प्रतिष्ठोर्वन्तरिक्षम्। यस्माद्देवा जज्ञिरे भुवनं
सर्वे। तत्सत्यमर्चदुर्पयज्ञन्न आगात्। ब्रह्माहुती-रुपमोदमानम्।

मनसो वशे सर्वमिदं बभूव । नान्यस्य मनो वश-मन्वियाय । भीष्मो हि देव स्सह स्सस्सहीयान् । मनो जुषाण उपयज्ञ मागात् । आकूतीना-मधिपतिं चेतसां च ॥ ३·३ ॥ संकल्पजूतिं देवं विपश्चिम् । मनो राजान-मिह वर्धयन्तः । उपहूवे ऽस्य सुमतौ स्याम । चरणं पवित्रं विततं पुराणं । येन पूतस्तरति दुष्कृतानि । तेन पवित्रेण शुद्धेन पूताः । अति पाप्मान मराति तरेम । लोकस्य द्वार-मर्चिमत्-पवित्रम् । ज्योतिष्मद्-भ्राजमानं महस्वत् । अमृतस्य धारा बहुधा दोहमानम् । चरणं नो लोके सुधितां दधातु । अग्निर्मूर्धा भुवः । अनु नोऽद्यानुमतिरन्विदनु मते त्वम् । हव्यवाहगुं स्विष्टम् ॥ ३·४ ॥ ३ ॥

देवेभ्यो वै स्वर्गो लोकस्तिरोऽभवत् । प्रजापति-मब्रुवन् । प्रजापते स्वर्गो वै नो लोकस्तिरोऽभूत् । तमन्विच्छेति । तं यज्ञ क्रतुभिरन्वैच्छत् । तं यज्ञक्रतुभि र्नान्वविन्दत् । तमिष्टिभि-रन्वैच्छत् । तमिष्टिभि-रन्वविन्दत् । तदिष्टीना-मिष्टित्वम् । एष्टयो ह वै नाम । ता इष्टय इत्याचक्षते परोक्षेण । परोक्ष प्रिया इव हि देवाः ॥ ४·१ ॥ तं तपोऽब्रवीत् । प्रजापते तपसा वै श्राम्यसि । अहमु वै तमोऽस्मि ।

मां नु यजस्व । अथ ते सत्यं तपो भविष्यति । अनु स्वर्गं लोकं वेत्स्यसीति । स एत मॉग्नेय-मष्टा-कपालं निरवपत् । तपसे चरुम् । अनुमत्यै चरुम् । ततो वै तस्य सत्यं तपोऽभवत् । अनु स्वर्गं लोकम-विन्दत् । सत्यगं हवा अस्य तपो भवति । अनु स्वर्गं लोकं विन्दति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । अग्नये स्वाहा तपते स्वाहा । अनुमत्यै स्वाहा प्रजापतये स्वाहा । स्वर्गाय लोकाय स्वाहा ऽग्नये स्विष्टकृते स्वाहेति ॥ ४·२ ॥ तगं श्रद्धा-ऽब्रवीत् । प्रजापते श्रद्धया वैश्राम्यसि । अहमु वै श्रद्धाऽस्मि । मां नु यजस्व । अथ ते सत्या श्रद्धा भविष्यति । अनु स्वर्गं लोकं वेत्स्यसीति । स एत-मॉग्नेय-मष्टाकपालं निरवपत् । श्रद्धायै चरुम् । अनुमत्यै चरुम् । ततो वै तस्य सत्या श्रद्धा ऽभवत् । अनु स्वर्गं लोकमविन्दत् । सत्या ह वा अस्य श्रद्धा भवति । अनु स्वर्गं लोकं विन्दति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । अग्नये स्वाहा श्रद्धायै स्वाहा । अनुमत्यै स्वाहा प्रजापतये स्वाहा । स्वर्गाय लोकाय स्वाहाऽग्नये स्विष्टकृते स्वाहेति ॥ ४.३ ॥

तगुं सत्यमब्रवीत् । प्रजापते सत्येन वै श्राम्यसि । अहमुवै सत्यमस्मि । मां नु यजस्व । अथ ते सत्यगुं सत्यं भविष्यति । अनु स्वर्गं लोकं वेत्स्यसीति । स एतमाग्नेय-मष्टाकपालं निरवपत् । सत्याय चरुम् । अनुमत्यै चरुम् । ततो वै तस्य सत्यगुं सत्यमभवत् । अनु स्वर्गं लोकमविन्दत् । सत्यगुं ह वा अस्य सत्यं भवति । अनु स्वर्गं लोकं विन्दति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । अग्नये स्वाहा सत्याय स्वाहा । अनुमत्यै स्वाहा प्रजापतये स्वाहा । स्वर्गाय लोकाय स्वाहा ऽग्नये स्विष्टकृते स्वाहेति ॥ ४'४ ॥ तं मनोऽब्रवीत् । प्रजापते मनसा वै श्राम्यसि । अहमुवै मनोऽस्मि । मां नु यजस्व । अथ ते सत्यं मनो भविष्यति । अनु स्वर्गं लोकं वेत्स्यसीति । स एत-माग्नेय-मष्टाकपालं निरवपत् । मनसे चरुम् । अनुमत्यै चरुम् । ततो वै तस्य सत्यं मनोऽभवत् । अनु स्वर्गं लोकमविन्दत् । सत्यगुं ह वा अस्य मनो भवति । अनु स्वर्गं लोकं विन्दति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । अग्नये स्वाहा मनसे स्वाहा । अनुमत्यै स्वाहा प्रजापतये स्वाहा । स्वर्गाय लोकाय

स्वाहा ऽग्नये स्विष्टकृते स्वाहेति ॥ ४.५ ॥ तं चरण-मब्रवीत् । प्रजापते चरणेन वै श्राम्यसि । अहमु वै चरणमस्मि । मां नु यजस्व । अथ ते सत्यं चरणं भविष्यति । अनु स्वर्गं लोकं वेत्स्यसीति । स एतमाग्नेयमष्टाकपालं निरवपपत् । चरणाय चरुम् । अनुमत्यै चरुम् । ततो वै तस्य सत्यं चरणमभवत् । अनु स्वर्गं लोकमविन्दत् । सत्यगं ह वा अस्य चरणं भवति । अनु स्वर्गं लोकं विन्दति । य एतेन हविषा यजते । य उ चैनदेवं वेद । सोऽत्र जुहोति । अग्नये स्वाहा चरणाय स्वाहा । अनुमत्यै स्वाहा प्रजापतये स्वाहा । स्वर्गाय लोकाय स्वाहाऽग्नये स्विष्टकृते स्वाहेति ॥ ४.६ ॥ ता वा एताः पंच स्वर्गस्य लोकस्य द्वारः । अगाधा अनुवित्तयो नाम । तपः प्रथमागं रक्षति । श्रद्धा द्वितीयाम् । सत्यं तृतीयाम् । मनश्चतुर्थीम् । चरणं पंचमीम् । अनु ह वै स्वर्गं लोकं विन्दति । कामचारोऽस्य स्वर्गे लोके भवति । य एताभिरिष्टिभि-र्यजते । य उ चैना एवं वेद । तास्वन्विष्टि । पष्ठौ ही वरां दद्यात्कगंसंच । श्रियै चाभारगं समृद्ध्यै ॥ ४.७ ॥ ४ ॥

ब्रह्म वै चतुर्होतारः। चतुर्होतृभ्योऽधियज्ञो निर्मितः। नैनगं शप्तम्। नाभिचरित-मागच्छति। य एवं वेद। यो ह वै चतुर्होतॄणां चतुर्होतृत्वं वेद। आथो पंचहोतृत्वम्। सर्वा हास्मै दिशः कल्पन्ते। वाचस्पति-र्होता दशहोतॄणाम्। पृथिवी होता चतुर्होतॄणाम् ॥५.१॥ अग्निर्होता पंचहोतणाम्। वाग्घोता षड्होतॄणाम्। महाहविर्होता सप्तहोतॄणां। एतेद्वै चतुर्होतॄणां चतुर्होतृत्वम्। अथो पंचहोतृत्वम्। सर्वा हास्मै दिशः कल्पन्ते। य एवं वेद। एषा वै सर्वविद्या। एतद्भेषजम्। एषा पंक्तिः स्वर्गस्य लोकस्यांजसायनिस्स्रुतिः ॥ ५.२ ॥ एतान् योऽध्यैत्य छंदिर्दर्शे यावत्तरसंम्। स्वरेति। अनपब्रवस्सर्व-मायुरेति। विन्दते प्रजाम्। रायस्पोषं गौपत्यम्। ब्रह्मवर्चसी भवति। एतान् योऽध्यैति। स्पृणोत्यात्मानम्। प्रजां पितॄन्। एतान् वा अरुण औपवेशिर्विदां चकार ॥ ५.३ ॥ एतैरविवाद-मपाजयत्। अथो विश्वं पाप्मानम्। स्वर्ययौ। एतान् योऽध्यैति। अविवादं जयति। अथो विश्वं पाप्मानम्। स्वरेति। एतैरग्निं चिन्वीत स्वर्गकामः। एतैरायुष्कामः। प्रजापशु-कामो वा ॥ ५.४ ॥ पुरस्ताद्दशहोतार-मुदंच-मुपदधाति यावत्पदम्।

हृदयं यजुषी पत्न्यौ च। दक्षिणतः प्रांचं चतुर्होतारम्। पश्चादुदंचं पंचहोतारम्। उत्तरतः प्रांचगं षड्ढोतारम्। उपरिष्टात्प्रांचगं सप्तहोतारम्। हृदयं यजूगंषि पत्न्यश्च। यथावकाशं ग्रहान्। यथावकाशं प्रतिग्रहान् लोकं पृणाश्च। सर्वा ह्यस्यै ता देवताः प्रीता अभीष्टा भवन्ति ॥ ५·५ ॥ सदेव-मग्निं चिनुते। रथसंमितश्चेतव्यः। वज्रो वै रथः। वज्रेणैव पाप्मानं भ्रातृव्यगं स्तृणुते। पक्षसंमितश्चेतव्यः। एतावान् वै रथः। यावत्पक्षः। रथसंमितमेव चिनुते। इममेव लोकं पशुबन्धेनाभिजयति। अथो अग्निष्टोमेन ॥ ५·६ ॥ आन्तरिक्ष-मुक्थ्येन। स्वरतिरात्रेण। सर्वान् लोकानहीनेन। अथो सत्रेण। वरो दक्षिणा। वरेणैव वरगं स्पृणोति। आत्मा हि वरः। एकविगंशति-र्दक्षिणा ददाति। एकविगंशो वा इतस्स्वर्गो लोकः। प्रस्वर्गं लोकमाप्नोति ॥ ५·७ ॥ असावादित्य एकविगंशः। अमुमेवादित्य-माप्नोति। शतं ददाति। शतायुः पुरुषः शतेन्द्रियः। आयुष्येवेन्द्रिये प्रतिष्ठति। सहस्रं ददाति। सहस्रसंमितस्स्वर्गो लोकः। स्वर्गस्य लोकस्याभिजित्यै। अन्विष्टकं दक्षिणा ददाति। सर्वाणि वयागंसि ॥ ५·८ ॥

सर्वस्याप्त्यै। सर्वस्यावरुद्ध्यै। यदि न विन्देत्। मन्थाने तावतो दद्यादोदनान् वा। अश्नुते तं कामम्। यस्मै कामायाग्निश्चीयते। पष्ठौहीन्त्वन्तर्वर्तीं दद्यात्। साहि सर्वाणि वयाग्ंसि। सर्वस्याप्त्यै। सर्वस्यावरुद्ध्यै ॥ ५.९ ॥ हिरण्यं ददाति। हिरण्यज्योतिरेव स्वर्गं लोकमेति। वासो ददाति। तेनायुः प्रतिरते। वेदिं तृतीये यजेत। त्रिषत्याहि देवाः। स सत्यमग्निं चिनुते। तदेतत्पशुबन्धे ब्राह्मणं ब्रूयात्। नेतरेषु यज्ञेषु। यो ह वै चतुर्होतॄननु सवनं तर्पयितव्यान् वेद ॥ ५.१० ॥ तृप्यति प्रजया पशुभिः। उपैनग्ं सोमपीथो नमति। एते वै चतुर्होतारोऽनुसवनं तर्पयितव्याः। ये ब्राह्मणा बहुविदः। तेभ्यो यद्दक्षिणा न नयेत्। दुरिष्टग्ं स्यात्। अग्निमस्य वृञ्जीरन्। तेभ्यो यथाश्रद्धं दद्यात्। स्विष्टमेवैतत् क्रियते। नास्याग्निं वृञ्जते ॥ ५.११ ॥ हिरण्येष्टको भवति। यावदुत्तम-मंगुलि-काण्डं यज्ञपुरुषासंमितम्। तेजो हिरण्यम्। यदि हिरण्यं न विन्देत्। शर्करा अक्ता उपदध्यात्। तेजो घृतम्। स तेजसमेवाग्निं चिनुते। अग्निं चित्वा सौत्रामण्या यजेत मैत्रावरुण्या वा। वीर्येण वा एष व्यृद्ध्यते।

योऽग्निं चिनुते ॥ ५·१२ ॥ यावदेव वीर्यम् । तदस्मिन् दधाति । ब्रह्मणस्सायुज्यगं सलोकतां-माप्नोति । एतासामेव देवतानागं सायुज्यम् । सार्ष्टितागं समानलोकतामाप्नोति । य एतमग्निं चिनुते । य उ चैनमेवं वेद । एतदेव सावित्रे ब्राह्मणम् । अथो नाचिकेते ॥ ७·१३ ॥ ५ ॥

यच्चामृतं यच्च मर्त्यम् । यच्च प्राणिति यच्च न । सर्वास्ता इष्टकाः कृत्वा । उप कामदुघा दधे । तेन ऋषिणा तेन ब्रह्मणा । तया देवतयाऽङ्गिरस्वद्ध्रुवासीद । सर्वाः स्त्रियः सर्वान् पुगंसः । सर्वं न स्त्रीपुमंच यत् । सर्वास्ताः । यावन्तः पांसवो भूमेः ॥ ६·१ ॥ संख्याता देवमायया । सर्वास्ताः । यावन्त ऊर्णाः पशूनाम् । पृथिव्यां पुष्टिर्हिताः । सर्वास्ताः । यावतीस्सिकताः सर्वाः । अप्स्वन्तश्च याः श्रिताः । सर्वास्ताः । यावतीः शर्करा धृत्यै । अस्यां पृथिव्यामधि ॥ ६·२ ॥ सर्वास्ताः । यावन्तोऽश्मानोऽस्यां पृथिव्याम् । प्रतिष्ठा सुप्रतिष्ठिताः । सर्वास्ताः । यावतीर्वीरुधः सर्वाः । विष्ठिताः पृथिवीमनु । सर्वास्ताः । यावतीरोषधीः सर्वाः । विष्ठिताः पृथिवीमनु । सर्वास्ताः ॥ ६·३ ॥ यावन्तो वनस्पतयः । अस्यां पृथिव्यामधि । सर्वास्ताः । यावन्तो ग्राम्याः

पशवस्सर्वे । आरण्याश्च ये । सर्वास्ताः । ये द्विपादश्चतुष्पादः । अपाद उदर सर्पिणः । सर्वास्ताः । यावदांजन-मुच्यते ॥ ६.४ ॥ देवत्रा यच्च मानुषम् । सर्वास्ताः । यावत्कृष्णायसगं सर्वम् । देवत्रा यच्च मानुषम् । सर्वास्ताः । यावल्लोहायसगं सर्वम् । देवत्रा यच्च मानुषम् । सर्वास्ताः । सर्वगं सीसगं सर्वं त्रपु । देवत्रा यच्च मानुषम् ॥ ६.५ ॥ सर्वास्ताः । सर्वगं हिरण्यगं रजतम् । देवत्रा यच्च मानुषम् । सर्वास्ताः । सर्वगं सुवर्णगं हरितम् । देवत्रा यच्च मानुषम् । सर्वास्ता इष्टकाः कृत्वा । उपकामदुघादधे । तेन ऋषिणा तेन ब्रह्मणा । तया देवतयाऽङ्गिरस्वध्रुवासीद ॥ ६.६ ॥

[यच्च स्त्रियः पागंसव ऊषाः सिकता-श्शर्करा अश्मानो वीरुध ओषधीर्वनस्पतयो ग्राम्या ये द्विपादो यावदांजनं कृष्णायसं लोहायसगं सीसगं हिरण्यगं सुवर्णगं हरितमष्टादश ॥] ६ ॥

सर्वा दिशो दिक्षु । यच्चान्तर्भूतं प्रतिष्ठितम् । सर्वास्ता इष्टकाः कृत्वा । उप कामदुघादधे । तेन ऋषिणा तेन ब्रह्मणा । तया देवतयाऽङ्गिरस्वध्रुवासीद । अन्तरिक्षं च केवलम् । यच्चास्मिन्नन्तराहितम् ।

सर्वास्ताः । आन्तरिक्षश्च याः प्रजाः ॥ ७.१ ॥ गन्धर्वाप्सरसंश्चये । सर्वास्ताः । सर्वानुदारान् सलिलान् । अन्तरिक्षे प्रतिष्ठितान् । सर्वास्ताः । सर्वानुदारान् सलिलान् । स्थावराः प्रोष्यांश्च ये । सर्वास्ताः । सर्वान्धुनिगुं सर्वान्ध्वगुंसान् । हिमो यश्च शीयते ॥ ७.२ ॥ सर्वास्ताः । सर्वान् मरीचीन् विततान् । नीहारो यश्च शीयते । सर्वास्ताः । सर्वा विद्युतस्सर्वान् स्तनयित्नून् । ह्रादुनी-र्यश्च शीयते । सर्वास्ताः । सर्वा-स्स्रवन्तीस्सरितः । सर्वमप्सु चरं च यत् । सर्वास्ताः ॥ ७.३ ॥ याश्च कूप्या याश्च नाद्या-स्समुद्रियाः । याश्च वैशन्ती-रुत प्रासचीर्याः । सर्वास्ताः । ये चोत्तिष्ठन्ति जीमूताः । याश्च वर्षन्ति वृष्टयः । सर्वास्ताः । तपस्तेजं आकाशम् । यच्चाकाशे प्रतिष्ठितम् । सर्वास्ताः । वायुं वयागुंसि सर्वाणि ॥ ७.४ ॥ अन्तरिक्षचरं च यत् । सर्वास्ताः । अग्निगुं सूर्यं चन्द्रम् । मित्रं वरुणं भगम् । सर्वास्ताः । सत्यगुं श्रद्धां तपो दमम् । नामरूपं च भूतानाम् । सर्वास्ता इष्टकाः कृत्वा । उपकाम-दुघांदधे । तेन ऋषिणा तेन ब्रह्मणा । तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद ॥ ७.५ ॥ ७ ॥

[दिशोऽन्तरिक्ष-मान्तरिक्ष्यं उदारानुदारां धुनिं मरीचीन् विद्युत-स्स्रवन्ती-र्याश्च ये च तपो वायु-मग्निगुं सत्यं पंचदश ॥] ७ ॥

सर्वान् दिवगुं सर्वान् देवान् दिवि । यच्चान्त-र्भूतं प्रतिष्ठितम् । सर्वास्ता इष्टकाः कृत्वा । उपकामदुघादधे । तेन ऋषिणा तेन ब्रह्मणा । तया देवतयाऽङ्गिरस्वध्रुवासीद । यावतीस्तारकाः सर्वाः । वितता रोचने दिवि । सर्वास्ताः । ऋचो यजूगुंपि सामानि ॥ ८.१ ॥ अथर्वांगिरसश्च ये । सर्वास्ताः । इतिहासपुराणं च । सर्पदेवजनाश्च ये । सर्वास्ताः । ये च लोका येचालोकाः । अन्तर्भूतं प्रतिष्ठितम् । सर्वास्ताः । यच्च ब्रह्म यच्चाब्रह्म । अन्तर्ब्रह्मन् प्रतिष्ठितम् ॥ ८.२ ॥ सर्वास्ताः । अहोरात्राणि सर्वाणि । अर्धमासागुंश्च केवलान् । सर्वास्ताः । सर्वान् ऋतून् सर्वान् मासान् । संवत्सरंच केवलम् । सर्वास्ताः । सर्वं भूतगुं सर्वं भव्यम् । यच्चातो ऽधि भविष्यति । सर्वास्ता इष्टकाः कृत्वा । उपकामदुघादधे । तेन ऋषिणा तेन ब्रह्मणा । तया देवतयाऽङ्गिर-स्वध्रुवासीद ॥ ८.३ ॥

[दिवं तारका ऋचं इतिहासपुराणं च ये च यच्चाहोरात्राण्यृतून् भूतं नवं ॥] ८ ॥

ऋचां प्राची महती दिगुच्यते । दक्षिणामाहुर्यजुषामपाराम् । अथर्वणामंगिरसां प्रतीची । साम्ना-मुदीची महती दिगुच्यते । ऋग्भिः पूर्वाह्णे दिवि देव ईयते । यजुर्वेदे तिष्ठति मध्ये अह्नः । सामवेदेनास्त-मये महीयते । वेदैरशून्यस्त्रिभिरेति सूर्यः । ऋग्भ्यो जाताᳪं सर्वशो मूर्तिमाहुः । सर्वा गतिर्याजुषी हैव शश्वत् ॥ ९·१ ॥ सर्वं तेजंस्सा-मरूप्यगुं ह शश्वत् । सर्वगुं हेदं ब्रह्मणा हैवसृष्टम् । ऋग्भ्यो जातं वैश्यं वर्णमाहुः । यजुर्वेदं क्षत्रियस्याहु-र्योनिम् । सामवेदो ब्राह्मणानां प्रसूतिः । पूर्वे पूर्वेभ्यो वच एतदूचुः । आदर्शमग्निं चिन्वानाः । पूर्वे विश्वसृजो ऽमृताः । शतं वर्षसहस्राणि । दीक्षिताᳪसत्रमासत ॥ ९· २ ॥ तप आसीद्गृहपतिः । ब्रह्म ब्रह्माभवत्स्वयम् । सत्यᳪह होतैषा मासीत् । यद्विश्वसृज आसंत । अमृतमेभ्य उदगायत् । सहस्रं परिवत्सरान् । भूतगुं ह प्रस्तोतैषामासीत् । भविष्यत्प्रतिचाहरत् । प्राणो अध्वर्युरभवत् । इदगुं सर्वगुं सिषासताम् ॥ ९·३ ॥ अपानो विद्वानावृतः । प्रति प्राति

ष्ठदध्वरे । आर्तवा उपगातारः । सदस्या ऋतवोऽभवन् । अर्धमासाश्च मासाश्च । चमसाध्वर्यवोऽभवन् । अशग्ंसद्ब्रह्मणस्तेजः । अच्छावाको ऽभवद्यशः । ऋतमेषां प्रशास्तासीत् । यद्विश्वसृज आसत ॥ ९.४ ॥ ऊर्गाजानमुदवहत् । ध्रुवगोपस्सहोऽभवत् । ओजो ऽभ्यष्टौदृग्रावृण्णः । यद्विश्वसृज आसत । अपचितिः पोत्रीया-मयजत् । नेष्ट्रीया-मयजत्त्विषिः । आग्नीध्राद्विदुषी सत्यम् । श्रद्धा हैवायजत्स्वयम् । इरापत्नी विश्वसृजाम् । आकूति-रपिनड्ढविः ॥ ९.५ ॥ इध्मगुंहक्षुचैभ्य उग्रे । तृष्णाचावहतामुभे । वागेषागुं सुब्रह्मण्यासीत् । छन्दो योगान् विजानती । कल्पतन्त्राणि तन्वानाहः । सगुंस्थाश्च सर्वशः । आहोरात्रे पशुपाल्यौ । मुहूर्ताः प्रेष्या अभवन् । मृत्युस्तदभवद्धाता । शमितोग्रो विशांपतिः ॥ ९.६ ॥ विश्वसृजः प्रथमास्सत्र-मासत । सहस्र-समं प्रसुते नयन्तः । ततो ह जज्ञे भुवनस्य गोपाः । हिरण्मयश्शकुनि-र्ब्रह्मनाम । येन सूर्यस्तपति तेजसेद्धः । पिता पुत्रेण पितृमान् योनि योनौ । ना वेदविन्मनुते तं बृहन्तम् । सर्वानुभुमात्मानगं संपराये । एष नित्यो महिमा ब्राह्मणस्य । न कर्मणा वर्धते नो कनीयान् ॥ ९.७ ॥ तस्यैवात्मा पदवित्तं विदित्वा ।

न कर्मणा लिप्यते पापकेन । पंचपंचाशतस्त्रिवृतस्संवत्सराः । पंच पंचाशतः पंचदशाः । पंच पंचाशतः सप्तदशाः । पंच पंचाशत एकविꣳशाः । विश्वसृजाꣳ सहस्रसंवत्सरम् । एतेन वै विश्वसृज इदं विश्वमसृजन्त । यद्विश्वमसृजन्त । तस्माद्विश्वसृजः । विश्वमेनाननुप्रजायते । ब्रह्मणस्सायुज्यꣳ सलोकतां यन्ति । एतासामेव देवतानाꣳ सायुज्यम् । सार्ष्टिताꣳ समानलोकतां यन्ति । एतदुपयन्ति । ये चैनत्प्राहुः । येभ्यश्चैनत्प्राहुः । ओम् ॥ ९'८ ॥ ९ ॥

हरिः ओ(३)म्

इति तैत्तिरीय-यजुर्ब्राह्मणे काठके

तृतीयः प्रश्नः समाप्तः ॥

काठकभागः समाप्तः ॥

# अनुबन्धः ॥

## मन्त्रानुक्रमणिका

### प्रथमो भागः


| १. शिक्षावल्ली | अनुवाकः |
|---|---|
| अथ यदि ते कर्म विचिकित्सा | ११·३ |
| अहं वृक्षस्य रेरिवा | १० |
| आकाश शरीरं ब्रह्म | ६·२ |
| आप्नोति स्वाराज्यं | ६·२ |
| आमायन्तु ब्रह्मचारिणः | ४·२ |
| ऋतं च स्वाध्याय | ९ |
| ओमिति ब्रह्म | ८ |
| जिह्वा मे मधुमत्तमा | ४·१ |
| पांक्तं वा इदं सर्वं | ७ |
| पृथिव्यन्तरिक्षं | ७ |
| मातृदेवो भव | ११·२ |
| यथापः प्रवतायन्ति | ४·३ |
| यश्छन्दसामृषभो | ४·१ |
| शन्नो मित्रः शं वरुणः | १ |
| शीक्षां व्याख्यास्यामः | २ |
| सत्यं वद | ११·१ |
| स य एषोऽन्तर्हृदय | ६·१ |
| स्वाध्यायप्रवचने एवेति | ९ |

| २. आनन्दवल्ली | अनुवाकः |
|---|---|
| अन्नाद्वै प्रजाः | २ |
| असन्नेव स भवति | ६ |
| एतं ह वाव न तपति | ९ |
| तत्सृष्ट्वा तदेवानुप्राविशत् | ६ |
| ब्रह्म विदाप्नोति परं | १ |
| भीषास्माद्वातः पवते | ८ |
| यतो वाचो निवर्तन्ते | ९ |
| रसो वै सः | ७ |
| विज्ञानं यज्ञं तनुते | ५ |
| स एको ब्रह्मण आनन्दः | ८ |
| सत्यं ज्ञानमनन्तं ब्रह्म | १ |
| स यश्चायं पुरुषे | ८ |
| सह नाववतु | १ |

| ३. भृगुवल्ली | |
|---|---|
| अन्नं न निन्द्यात् | ७ |
| अन्नं ब्रह्मेति | २ |
| अहमन्नमहमन्नं | १० |
| आनन्दो ब्रह्मेति | ६ |
| एतत्सामगायन्नास्ते | १० |
| एतमन्नमयमात्मानं | १० |
| तपसा ब्रह्म विजिज्ञासस्व | २ |
| तन्नम इत्युपासीत | १० |
| स यश्चायं पुरुषे | ८ |

| ४. नारयणवल्ली | अनुवाक | | |
|---|---|---|---|
| अग्निश्च मा मन्युश्च | ३१ | गन्धद्वारां | १·१० |
| अघोरेभ्यो | १९ | घृणिः सूर्य आदित्यो | ३७ |
| अंगुष्ठमात्रः पुरुषो | ७१ | चत्वारि शृंगाः | १२·२ |
| अजामेकां लोहित | १२·१ | चरणं पवित्रं | १·११ |
| अणोरणीयात् | १२·१ | जातवेदसे सुनवाम | २ |
| अदितिर्देवा गन्धर्वा | २८ | तत्पुरुषाय विद्महे | १·५-१९ |
| अथानो देव सवितः | ३९ | तस्यैवं विदुषो | ८० |
| अन्नेन प्राणाः | ७९ | देवकृतस्यै न सो | ५९ |
| अम्भस्य पारे | १·१ | त्रिधाहितं पणिभिः | १२·३ |
| आदित्यो वा एष | १४ | त्रिसुपर्ण-मयाचितं | ३८·४० |
| आदित्यो वै तेज | १५ | त्रीणि पदा निहिता | १·४ |
| आपः पुनन्तु | ३० | त्र्यम्बकं यजामहे | ५८ |
| आपो वा इदꣳ सर्वं | २९ | त्वमग्ने द्युभिः | ७८ |
| आपो हिष्ठा मयो | १·११ | न कर्मणा न प्रजया | १२.३ |
| आयातु वरदा देवी | ३४ | न तस्येशे कश्चन | १.२ |
| आर्द्रं ज्वलति | १·१५ | निधनपतये नमः | १६ |
| ईशानः सर्व विद्यानां | २१ | नीलतोयदमध्यस्थात् | १३·२ |
| उत्तमे शिखरे जाते | ३६ | पद्मकोश प्रतीकाशं | १३,२ |
| उद्दीप्यस्व जातवेदो | १·४ | प्रजापते न त्वदेतानि | ५४ |
| ऋतं तपः सत्यं तपः | १० | प्राजापत्यो हारुणिः | ७९ |
| ऋतꣳ सत्यं परं ब्रह्म | १३ | प्राणोपान व्यानो | ६५ |
| ओमित्येकाक्षरं ब्रह्म | ३३ | पृथिव्यापस्तेजो | ६६ |
| ओं तत् ब्रह्म | ६८ | ब्रह्मजज्ञानं | १·१० |
| ओं भूः ओं भुवः | ३५ | ब्रह्ममेतु मां | ३८ |
| काण्डात्काण्डात् | १·७ | ब्रह्मा देवानां | १२·१ |
| कामोऽकार्षीत् | ६१ | भूरन्नमग्नये | ३ |
| | | मधुवाता ऋतायते | ३९ |

| | |
|---|---|
| मयिमेधा मयि प्रजा | ४४ |
| मानस्तोके तनये | ५३ |
| मेधा देवीजुषमाण | ४१ |
| मृत्तिके हन मे | १·८ |
| वामदेवाय नमो | १८ |
| विरजा विपाप्मा | ६५- |
| विश्वतश्चक्षुः | १·३ |
| श्रीर्मे भजतु | १·१० |
| शिवेन मे सन्तिष्ठस्व | ७७ |
| श्रद्धायां प्राणे | ६९ |
| सत्यं परं परस्सत्यं | ७८ |
| सत्ये सर्वं प्रतिष्ठितं | ७९ |
| सद्यो जातं | १७ |
| स ब्रह्म स शिवः | १३·२ |
| सहस्रपरमा देवी | १·७ |
| सहस्रशीर्षं देवं | १३·१ |
| सूर्यश्च मा मन्युश्च | ३२ |
| स्वस्ति न इन्द्रो | १·९ |
| हंसः शुचिषत् | १२·२, ४० |
| हिरण्यशृंगं | १·१२ |
| हृदयं यूपः काम आज्यं | ८० |


## द्वितीयो भागः

### (१) श्रीरुद्रप्रश्नः


| | अनुवाक |
|---|---|
| आसीनेभ्यः शयानेभ्यश्च | ३ |
| उतैनं गोपा अदृशन् | १ |
| कुलालेभ्यः कर्मारेभ्यश्च | ४ |
| ज्येष्ठाय च कनिष्ठाय च | ६ |
| तक्षभ्यो रथकारेभ्यश्च | ४ |
| तस्कराणां पतये नमः | ३ |
| तिष्ठद्भ्यो धावद्भ्यश्च | ३ |
| त्र्यम्बकं यजामहे | ११ |
| नमः सोमाय च | ८ |
| नमः शिवाय च | ८ |
| नमस्ते अस्तु भगवन् | १ |
| नमो रुद्रेभ्यो | ११ |
| प्राणानां ग्रन्थिरसि | ११ |
| मानस्तोके तनये | १० |
| विरूपेभ्यो विश्व | ४ |
| सभाभ्यः सभापतिभ्यश्च | ६ |
| सहस्राणि सहस्रशो | ११ |


### (२) चमकप्रश्नः


| | अनुवाक |
|---|---|
| अग्नाविष्णू सजोषसे | १ |
| अग्निश्च म इन्द्रश्च मे | ६ |
| आयुर्यज्ञेन कल्पतां | १० |
| इडा देवहूः | ११ |
| मधु मनिष्ये | ११ |
| शंच मे मयश्च मे | ३ |
| सूषा च मे सुदिनं च मे | ३ |

## (३) पुरुषसूक्तम्

अजायमानो बहुधा २·१
अत्यतिष्ठद्दशांगुलं १·१
आदित्यवर्णं तमसः १·७
चन्द्रमा मनसो जातः १.६
तमेवं विद्वानमृत १·७
तस्य देवा असन् वशे २·२
नान्यः पन्था विद्यते १·७
पादोऽस्य विश्वा १·२
पुरुष एवेद१ँ सर्वं १.१
पूर्वो यो देवेभ्यो २·२
ब्राह्मणोऽस्यमुखमा १·५
वेदाहमेतं पुरुषं १·७

अनुवाक

यज्ञेन यज्ञमयजन्त १·७
सहस्रशीर्षा पुरुषः १·१
ह्रीश्चते लक्ष्मीश्च २·२

## (४) नारायणसूक्तम्

अन्तर्बहिश्च तत्सर्वं २
नारायण परंब्रह्म १
नीलतोयद मध्यस्थात् १
यच्च किंचिज्जगत् १
विश्वं नारायणं देवं २
स ब्रह्म स शिवः २

## (५) विष्णुसूक्तम्

यस्योरुषु त्रिषु १
विष्णोर्नुकं वीर्याणि १

## (६) श्रीसूक्तम्

क्षुत्पिपासा मलां १
गन्धद्वारां १
तां पद्मिनीमीं शरणमहं १
न क्रोधो न च मात्सर्यं २
महालक्ष्मी च विद्महे २
हिरण्यवर्णां हरिणीं १

## (७) भूसूक्तम्

अस्यप्राणादपानत्यन्तः १
आदित्या विश्वेतद्देवा १
इन्दीवराक्षीं नवशालि २
मनो ज्योतिर्जुषतां १
मेदिनी देवी २
विष्णुपत्नीं महीं देवीं २
श्रृंगे श्रृंगे यज्ञे यज्ञे २

## (८) नीळा सूक्तम्

नीळां देवीं शरणमहं १·१
निष्टम्भो दिवोधरुण१ँ १.५

## (९) दुर्गासूक्तम्

जातवेदसे सुनवाम १·१
तामग्निवर्णां १·२
दुर्गां देवीं शरणमहं १.२
विश्वानि नो दुर्गहा १·४

## (१०) भाग्य सूक्तम्

प्रातरग्निं प्रातरिन्द्र१ँ १·१
भग एव भगवाग्ं अस्तु १·५
योमाऽग्ने भागिन१ँ १·८

(११) देवी सूक्तम्

अहं रुद्राय धनुरातनोमि १·६

अहं रुद्रेभिर्वसुभिः १.१

अहमेव स्वयमिदं वदामि १.५

(१२) रात्रिसूक्तम्

ओं रात्री व्यख्यदायती १·१

निग्रामासो अविक्षत १·५

यावया वृक्य(अं) १·६

(१३) पवमानसूक्तम्

आत्मानं पुनते सदा २

हिरण्य वर्णाः शुचयः १

शिवेन मा च क्षुषा १

(१४) मेधासूक्तम्

अप्सरासु च या मेधा १·४

त्वया जुष्ट ऋषिर्भवति १·२

मेधा देवी जुषमाणा १.१

(१५) आयुष्य सूक्तम्

एकः पुरस्तात् य इदं ७

दाक्षायण्यः सर्वयोन्यः ५

ब्रह्मज्योति-र्ब्रह्मपत्नीषु ३

यो ब्रह्मा ब्रह्मण उज्जहार १

(१६) नक्षत्रसूक्तम्

अश्विनी २८

भरणी २९

कृत्तिका १

क्रमेण इतर नक्षत्राणि २-२७

(१७) शान्ति पञ्चकम्

तच्छं योरावृणीमहे ५

नमो वाचो या ४

शं नो मित्रः १

शं नो मित्रः २

सह ना ववतु ३

(१८) सन्ध्यावन्दनम्

पूर्वभागः १-९

उत्तरभागः जपविधिः १०-१३

उपस्थानम् १४-२२

समर्पणम्-रक्षा १३-२४

(१९) समिदाधानम्

पूर्व भागः १-१३

उपस्थानं-रक्षा १४-१५

(२०) ब्रह्मयज्ञः

पूर्व भागः १-८

तर्पणम् ९-११

(२१) यज्ञोपवीतधारणम्

(२२) पितृपूजामन्त्राः

पितृतर्पणम् १-१०

श्राद्धम् ११.४१

(२३) होममन्त्राः

औपासनम् १.५

पूर्णाहुति-मन्त्रः ६.७

उपस्थानम् ८.१०

(२४) जयादिमन्त्राः

(२५) देवपूजामन्त्राः

कलशपूजा-शंखपूजा १.२

आवाहनम् ३.५

गन्धं-पुष्पम् ६.७
धूपं-दीपं ८·१३
निवेदनम् १४·१५
नीराजनम् १६
मन्त्रपुष्पम् १७

## (२६) काठक भागः

अग्नाविष्णूसजोषसा २·३ .१
अग्निर्मे वाचि श्रितः १·८ ·४
अग्निष्टोम उक्थ्यो १·१ .४
अनन्ता वै वेदाः १·११·४
अनन्तोस्यपारोसि २·१ ·१
अन्धोजागृविः प्राण १·८ ·३
अयमहमस्मीति १·११·१
असवे स्वाहा १·७ ·१
अहोरात्राणीष्टका १·४ ·२
इयं वाव सरघा १·१०·१
उशनहवै वाजश्रवसः २·८ ·१
ऋग्भ्यो जातं वैश्यं ३·९ ·२
एष नित्यो महिमा ३·९ ·७
ओजोसि सहोसि २·१ ·२१
चरणं पवित्रं विततं ३·३ ·४
चित्रः केतुः प्रभा १·१ ·१
तद्विष्टीनामिष्टित्वं ३·२ ·२
तपसा देवा देवतां ३·३ ·१
तेजस्वी यशस्वी २·९·८
तेन मे तप तेन मे ज्वल १·३·१
त्वमग्ने रुद्रो असुरो २·२·१
त्वमेव त्वां वेत्थ १·३·१
दर्शा दृष्टा १·१·१
दिवं मे यच्छ १·४·३
न कर्मणा वर्धते ३·९·८
नाहोरात्रेष्वार्ति १·१०·२
प्रथमा द्वितीयेषु २·२·१
प्रजापतिर्देवानसृजत १·९·१
ब्रह्मचारिणे प्रश्नान् १·९·३
भरद्वाजो ह त्रिभि १·११·२
भूरग्निं च पृथिवीं च १·२·१
यस्तन्न वेद किं ऋचा १·९·१४
यथावकाशं ग्रहान् ३·५·५
यदि हिरण्यं न विन्देज ३·५·१२
ये ते सहस्रमयुतं १·८·२
राज्ञी विराज्ञी १·६·१
रोचनो रोचमानः १·१·१
वसोर्धारायाः २·९·९
विश्वं यज्ञं विश्वं भूतं २·१·१
शतरुद्रीयस्य रूपं २·९·९
शतायुः पुरुषः ३·५·८
संज्ञानं विज्ञानं १·१·१
संवत्सरोसि १·४·१
सप्त ते अग्ने २·५·१
सामवेदो ब्राह्मणानां ३·९·२
सुहस्तः सुवासाः १·८·४